# Kubjika Upasanamrita PurnopaniShad

# કુબ્જિકોપાસનામૃતપૂર્ણોપનિષત્

## Document Information

Text title : Kubjika Upasanamrita Purnopanishad

File name : kubjikopAsanAmRRitapUrNopaniShat.itx

Category : upanishhat, devii, devI, dashamahAvidyA, upaniShat

Location : doc_upanishhat

Proofread by : Mandar Kulkarni

Source : The Kubjika Upanishad, T. Goudriaan and J. A. Schoterman (Eds) archive.org 1994

Latest update : January 26, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 26, 2026

*sanskritdocuments.org*

# કુબ્જિકોપાસનામૃતપૂર્ણોપનિષત્

અથ કુબ્જિકોપાસનામૃતપૂર્ણોપનિષત્ ।

## ॥ ૧॥

શ્રીગણેશાય નમઃ ॥ ૐ પરામૃતરૂપિણ્યૈ સચ્ચિદાનન્દકન્દાયૈ શ્રીમહાકુબ્જિકાયૈ નમો નમઃ ॥ અથ હૈનાં બ્રહ્મરન્ધ્રે પરબ્રહ્મસ્વરૂપિણીં પશ્ચિમામ્નાયેશ્વરીં મહાકુબ્જિકામાપ્નોતિ ॥ ૧॥

પ્રાણેશઃ સુગ્રીવઃ સંવર્તકો વૈકુણ્ઠો ધરા ત્રિધાતુર્વહ્નિર્વ્યાપકો મહાવિદ્યેશ્વરીસંયુતં પ્રથમમ્ । દ્વિતીયં સહજઃ પરમાત્મા નૃસિંહં કાલરુદ્રં ખડ્ગી શઙ્કુરં વહ્નિવર્ણં ચામુણ્ડા તૂર્યસ્વરભૂષિતં નાદબિન્દુયુતમ્ ॥ ૨॥

મહાકૂટં કૂટરાજં સર્વકૂટોત્તમં મહાકુબ્જિકાકૂટરાજં યો જાનાતિ સ મહાદેવો ભવતિ સ સર્વદેવમયો ભવતિ સ સર્વદેવસમો ભવતિ ॥ ૩॥

સોઽર્યમા સ વરુણઃ સ રુદ્રઃ સ મહાદેવઃ ।
સો અગ્નિઃ સ ઉ સૂર્યઃ સ ઉ એવં મહાયમઃ ॥ ૪॥

સ ચન્દ્રઃ સેન્દ્રઃ સ પ્રાણઃ સોઽક્ષરઃ પરમઃ સર્વેશ્વરઃ સ્વરાટ્ । સ કાલઃ સ પૃથ્વી સાત્મા સોઽન્તરિક્ષઃ પ્રજાપતિઃ ॥ ૫॥

પ્રજાપતિરબ્રવીત્ ॥ પશ્ચિમસિંહાસનસ્થાં મહાકુબ્જિકાં ગુહ્યકુબ્જિકાં રુદ્રકુબ્જિકાં વીરકુબ્જિકાં શ્મશાનકુબ્જિકાં ઘોરકુબ્જિકાં સંહારકુબ્જિકાં પ્રચણ્ડોગ્રકુબ્જિકાં વ્યાખ્યાસ્યામઃ ॥ ૬॥

સ સર્વેષુ વેદેષુ સારં સ સર્વેષુ દેવેષુ સારં સારાત્સારતરાં મહાવિદ્યારાજ્ઞી સિદ્ધિકુબ્જિકાં શ્રીલક્ષ્મીકુબ્જિકાં શ્રીસિદ્ધિલક્ષ્મીકુબ્જિકાં યો વેત્તિ સ ખે- ચરત્વં પ્રાપ્નોતિ સ રુદ્રત્વં પ્રાપ્નોતિ સ નિર્વાણેશ્વરો ભવતિ સ સર્વસિદ્ધેશ્વરો ભવતિ સ પરકાયપ્રવેશકરણસામર્થો ભવતિ સ મહાણિમાદ્યષ્ટસિદ્ધિભાગ્ભવતિ
સ મહાકવિર્ભવતિ સ દેવેન્દ્રસમો ભવતિ ॥ ૭॥

ત્વમિન્દ્રસ્ત્વં મહેન્દ્રસ્ત્વં લોકસ્ત્વં પ્રજાપતિઃ ।
તુભ્યં યજ્ઞો વિજાયતે તુભ્યં જુહ્વતિ જુહ્વતસ્તવેદ્વિષ્ણો બહુધા વીર્યાણિ ॥ સ મહાવિષ્ણુર્ભવતિ ॥ ૮॥

પિપ્પલાદોઽઙ્ગિરાઃ સનત્કુમારશ્ચાથર્વણં ભગવન્તં પપ્રચ્છ ભગવાન્સનત્કુમાર- શ્ચાથર્વણ કુબ્જિકામહાપશ્ચિમામ્નાયેશ્વર્યાઃ કિં મન્ત્રં કિં યન્ત્રં કેન તન્ત્રેણ પૂજનં કિં દેવં કાન્યઙ્ગાનિ દેવતાનિ કિં છન્દઃ ક ઋષિરિતિ ॥ ૯॥

સ હોવાચ ભગવાન્સનત્કુમારઃ ॥ પ્રત્યઙ્ગિરે મહારાજવિધે કુબ્જિકામહાપશ્ચિમામ્નાયેશ્વર્યા યન્ત્રરાજં સર્વયન્ત્રમયં સર્વમન્ત્રમયં મહાસામ્રાજ્યસિદ્ધિપ્રદં રાજ્યદં ભોગદં મોક્ષદં મહાનિર્વાણદં દેવીસાદેહસારૂપ્યસાયુજ્યસાલીનમોક્ષદં મહાકુબ્જિકાયન્ત્રં મહામન્ત્રરાજં પ્રાણાન્તસઙ્કટોપદ્રવેઽપિ સર્વથા ન પ્રકાશયેત્ । પ્રકાશાન્મહાકુબ્જિકા ક્રુદ્ધા ભવતિ । પઞ્ચત્વં પ્રાપ્નોતિ । તસ્માદ્યત્નેન ગોપયેન્ન પ્રકાશયેત્ ॥ ૧૦॥

મહાયન્ત્રરાજમ્ । બિન્દુસ્ત્રિકોણં ષટ્કોણમષ્ટદલમષ્ટકોણાકૃતિ ચતુરશ્રં દ્વારશોભાઢ્યમ્ । કુબ્જિકાપૂજાયન્ત્રરાજં મહાપ્રત્યઙ્ગિરે સર્વદા સ્વહૃદયે શિખાયાં બાહૌ યો ધારયેત્સ વેતાલભૈરવો ભવતિ સ પ્રચણ્ડભૈરવો ભવતિ । શિખાયાં યો ધારયતિ સ સર્વપાપૈઃ પ્રમુચ્યતે । બાહૌ યો ધારયતિ સ સર્વાન્ શત્રૂન્મારયતિ ત્રૈલોક્યવિજયી ભવતિ સૃષ્ટિં સ્થિતિં સંહારં કરોતિ સ સર્વેશ્વરો ભવતિ સ વીરેશ્વરો ભવતિ સ નાટેશ્વરો ભવતિ સ રાજરાજેશ્વરો ભવતીતિ વદન્તિ બ્રહ્મવાદિનઃ ॥ ૧૧॥

કુબ્જનાથં યજેદાદૌ કુબ્જિનીં ચ તતો યજેત્ ।
કુબ્જિકાં ચ યજેત્પશ્ચાત્કુબ્જિકાખ્યાતવિનાયકમ્ ॥ ૧૨॥

સમ્પૂજ્ય વિધિવન્નિત્યં ભોગમોક્ષમવાપ્નુયાત્ ।
વિના યન્ત્રેણ ચેત્પૂજા કુબ્જિકા ન પ્રસીદતિ ॥ ૧૩॥

તસ્માત્સર્વપ્રયત્નેન યન્ત્રપૂજાં સમાચરેત્ ।
કુબ્જેશં ચ યજેદ્વામે કુબ્જિકાં દક્ષિણે યજેત્ ॥ ૧૪॥

અથ કુબ્જેશ્વરસ્ય મહાત્રયોદશાર્ણમન્ત્રોદ્ધારં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં સર્વબી- જોત્પાદકં મહાબીજમ્ । દ્વિતીયં પ્રાસાદબીજમ્ । પ્રાસાદબીજં તુ પરમાત્મા ગ્રહેશસ્વરસંયુતં કલાબિન્દુમિલિતમ્ । પ્રાસાદબીજં દ્વિતીયમ્ । તૃતીયં ક્રોધબીજમ્ । ક્રોધબીજં તુ પરમાત્મા ત્રિવિક્રમસ્વરભૂષિતં કલાવિશ્વયોનિમિલિતમ્ । ક્રોધબીજં તૃતીયમ્ । ચતુર્થં કુબ્જેશ્વરાય । નૃસિંહબીજમ્ । નૃસિંહબીજં તુ ક્ષેત્રપાલઃ પ્રકાશારૂઢશ્ચ ગ્રહેશસ્વરભૂષિતં નાદબિન્દુમિલિતમ્ । મહાનૃસિંહબીજં નવમમ્ । દશમં કામરૂપી પ્રયાગઃ પ્રકાશારૂઢાધારશક્તિસ્વરભૂષિતં કલાબિન્દુયુતમ્ । મહારાવબીજમ્ । તતોઽઙ્કુશબીજમ્ । અઙ્કુશબીજં તુ માહેશ્વરી રેવતીસમારૂઢા પશ્ચિમાસ્યસ્વરભૂષિતં નાદબિન્દુયુતમ્ । મહાબીજરાજમ્ । દ્વાદશં શબ્દાત્મા । મહાજીવઃ કલાપૂર્ણસ્વરભૂષિતમ્ ॥ ૧૫॥

મહાકુબ્જેશ્વરમન્ત્રરાજં યો જાનાતિ સ ભૂર્ભુવઃ સ્વર્લોકં મહર્લોકં જનર્લોકં તપોલોકં સત્યલોકં જયતિ સ સર્વલોકં જયતિ । ય એવં વેદ મહાકુબ્જિકોપનિષત્સર્વોપનિષત્સારમ્ । સ સહસ્રાયુષ્યમાપ્નોતિ ॥ ૧૬॥

પ્રજાપતેરાવૃતો બ્રહ્મણા વર્મણાહં કશ્યપસ્ય જ્યોતિષા વર્ચસા ચ ।
જરદષ્ટિઃ કૃતવીર્યો વિહાયાઃ સહસ્રાયુઃ સુકૃતશ્ચરેયમ્ ॥ ૧૭॥

સ દીર્ઘાયુષ્યમાપ્નોતિ સ સર્વાન્કામાનવાપ્નોતિ સ સર્વાન્ભોગાનવાપ્નોતિ સ સ-

ર્વાન્દેવાન્ જયતિ સ સર્વાન્ લોકાન્ જયતિ ય એવં વેદ મહાકુબ્જિકોપનિષત્ ॥ ૧૮॥

## ॥ ૨॥

મહાયન્ત્રં મહામન્ત્રં કુબ્જિકોપનિષદં પરમ્ ।
મહાધ્યાનં મહાપાત્રં મહામાલાં તથૈવ ચ ॥ ૧॥

ગોપયેચ્ચ પ્રયત્નેન સર્વથા ન પ્રકાશયેત્ ।
પ્રકાશાત્સિદ્ધિહાનિઃ સ્યાત્પ્રકાશાન્મરણં ધ્રુવમ્ ।
તસ્માત્સર્વપ્રયત્નેન ગોપયેન્ન પ્રકાશયેત્ ॥ ૨॥

સનત્કુમારશ્ચાથર્વણઃ પિપ્પલાદશૌનકતૌદમૌદતૌદાયનજાબાલબ્રહ્મપલશાકુન- ખીદેવદૃશીચારણવિદ્યાશ્ચેત્યથર્વણસ્ય નવશાખાપારજ્ઞઃ સનત્કુમારોવાચ । મહાકુબ્જેશ્વરયન્ત્રરાજં વ્યાખ્યાસ્યામઃ ॥ ૩॥

પુણ્ડરીકં નવદ્વારં ત્રિભિર્ગુણેભિરાવૃતમ્ ।
તસ્મિન્યદ્યક્ષમાત્મન્વત્તદ્વૈ બ્રહ્મવિદો વિદુઃ ॥ ૪॥

નવદ્વારં નવકોણમ્ । પુણ્ડરીકમષ્ટપત્તમ્ । ત્રિભિર્ગુણેભિરાવૃતં વૃત્તત્રયમિતિ । તસ્મિન્યદ્યક્ષં બિન્દુચક્રમાત્મન્વદ્બ્રહ્મવિદ્બ્રહ્મચક્રં કુબ્જેશ્વરયન્ત્રરાજં બ્રહ્મચક્રં વિદુઃ ॥ ૫॥

યો અક્રન્દયત્સલિલં મહિત્વા યોનિં કૃત્વા ત્રિભુજં શયાનઃ ।
કુબ્જઃ કામદુહો વિરાજઃ સ ગુહા ચક્રે તન્વઃ પરાચૈઃ ॥ ૬॥

યાનિ ત્રીણિ બૃહન્તિ યેષાં ચતુર્થં વિયુનક્તિ વાચમ્ ।
બ્રહ્મૈનદ્વિદ્યાત્તપસા વિપશ્ચિદ્યસ્મિન્નેકં યુજ્યતે યસ્મિન્નેકમ્ ॥ ૭॥

યોનિં કૃત્વાદૌ ત્રિકોણં બિન્દુચક્રં ભવતિ । તદ્બહિર્નવકોણં તદ્બાહ્યે રસકોણં પુણ્ડરીકમષ્ટપત્રં ચક્રં તતઃ ષોડશપત્રં ચક્રં ત્રિભિર્ગુણેભિરાવૃતં બહિરષ્ટકોણં ચતુરસ્રચક્રરાજં તદ્બહિઃ સન્ધ્યાવૃત્તં તદ્બાહ્યે દ્વાત્રિંશતિપત્રં ચક્રં તતશ્ચતુઃષષ્ટિપત્રં ચક્રં બહિર્માયયાવૃત્તત્રયં માયાકામકૂર્ચબીજેન ભૂપુરં સંલિખેદિતિ ॥ ૮॥

અષ્ટકોણં નવદ્વારં ત્રિભિર્ગુણેભિરાવૃતમ્ ।
દ્વાત્રિંશતિદલં પદ્મં ચતુઃષષ્ટિદલં તથા ॥ ૯॥

માયાકામક્રોધબીજેન વેદદ્વારં સમાલિખેત્ ।
ઇદં કુબ્જેશ્વરં યન્ત્રં સર્વયન્ત્રોત્તમં પરમ્ ॥ ૧૦॥

સેવકાનાં મોક્ષકરમાયુરારોગ્યવર્ધનમ્ ।
અપુત્રીણાં પુત્રદં ચ બહુના કિમનેન વૈ ।
ઇદં રહસ્યં પરમમીશ્વરસ્યાપિ દુર્ગમમ્ ॥ ૧૧॥

ઇદં કુબ્જેશ્વરં યન્ત્રં શઠાય કુટિલાય મહાનિન્દકાય પરશિષ્યાય પ્રાણાન્તેઽપિ સર્વથા ન પ્રકાશયેદિતિ વદન્તિ બ્રહ્મવાદિનઃ શૌનકાઃ ॥ ૧૨॥

મહોગ્રં વિરૂપાક્ષં નીલકણ્ઠં કુબ્જેશ્વરં ઘોરરૂપં મહાકાલરૂપં શેષયજ્ઞોપવીતધરં વિશ્વરૂપં વિરૂપં વિરાડ્રૂપં મહાકુબ્જિકાર્ધાઙ્ગધરં પશ્ચિમસિંહાસનસ્થં પશ્ચિમા-
મ્નાયક્રમપૂજનપ્રિયં રક્તપાનપ્રિયં મહામાંસચર્વણપ્રિયં નરચર્માસનપ્રિયં ચતુર્દિક્ષુ શ્મશાને મહામાંસચિતાઙ્ગારાસ્થિશય્યાસનસ્થં
કઙ્કાલમાલાભૂષિતં વીરમુણ્ડમા- લાધરં મહાભૂતવેતાલકરતાલપ્રેતમણ્ડલમધ્યસ્થં મહાયન્ત્રસિંહાસનસ્થં પઞ્ચમ-
હાપ્રેતાસનસ્થં પ્રેતાટ્ટહાસપ્રિયં પ્રેતમાલાધરં પશ્ચિમાભિમુખં મહાકુબ્જેશ્વરં શતવક્ત્રં ત્રિંશલ્લોચનં સહસ્રબાહુપુરુષં
મહાકુબ્જેશ્વરં ધ્યાયેત્ ॥ ૧૩॥ સહસ્રશીર્ષં રુદ્રં સહસ્રાક્ષમ્ ।
તે પઞ્ચર્ચ્યઃ । તસ્યાઃ શિખાયા મધ્યે પુરુષઃ કુબ્જેશ્વરઃ સ્થિતઃ ॥ ૧૪॥

એક એવ રુદ્રોઽવતસ્થે ન દ્વિતીયઃ ।
અસઙ્ખ્યાતા સહસ્રાણિ યે રુદ્રા અધિ ભૂમ્યામ્ ॥

એકમેવાદ્વિતીયં બ્રહ્મ । બ્રહ્મસ્વરૂપા કુબ્જિકા ॥ ૧૫॥

કત્યક્ષરા કતિપદા મહાવિદ્યા ॥ સનત્કુમારઃ પ્રોવાચ ॥ મહાસપ્તદશાક્ષરી સિદ્ધિકુબ્જિકા । ષોડશાક્ષરી મહોગ્રકુબ્જિકા । દ્વાવિંશત્યક્ષરી મહાવીરકુબ્જિકા । દ્વાદશાક્ષરી મહાજ્ઞાનકુબ્જિકા । સપ્તાક્ષરી મહાભીમકુબ્જિકા । નવાક્ષરી સિદ્ધિલક્ષ્મીકુબ્જિકા । ષડક્ષરી મહાપ્રચણ્ડકુબ્જિકા । પઞ્ચાક્ષરી પરા રુદ્રકુબ્જિકા । મહાકૂટાષ્ટાદશાક્ષરી શ્રીકુબ્જિકા ॥ એતા એવ મહાકુબ્જાભેદવિદ્યાઃ પ્રકાશિતાઃ ॥ ૧૬॥

ય એવં વેદ કુબ્જિકાભેદમન્ત્રરાજં સ સર્વદેવપૂજ્યો ભવતિ સ સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ સ સર્વૈર્દેવૈરનુધ્યાતો ભવતિ સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ સ સર્વમન્ત્રજાપકો ભવતિ સ સર્વયન્ત્રપૂજકો ભવતિ સ બ્રહ્મપૂતો ભવતિ સ વિષ્ણુપૂતો ભવતિ સ રુદ્રપૂતો ભવતિ સ સૂર્યપૂતો ભવતિ સ સોમપૂતો ભવતિ સ સત્યપૂતો ભવતિ સ સર્વપૂતો ભવતિ ય એવં વેદ મહાકુબ્જિકોપનિષત્ ॥ ૧૭॥

## ॥ ૩॥

અથ મહાસપ્તદશાક્ષરીં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં વેદાદિબીજમ્ । દ્વિતીયં માયાબીજમ્ । તૃતીયં ક્રોધબીજમ્ । ચતુર્થં રાવબીજમ્ । પઞ્ચમં નૃસિંહબીજમ્ । મહાઙ્કુશં ષષ્ઠમમ્ । મહાકુબ્જિકેત્યેવં સમુચ્ચાર્ય તતોઽઙ્કુશબીજં નૃસિંહબીજં રાવબીજં ક્રોધબીજં માયાબીજં વેદાદિબીજમિતિ સપ્તદશાક્ષરી ॥ ૧॥

મહામન્ત્રરાજ્ઞીં યો જાનાતિ સર્વલોકં જયતિ સ ત્રૈલોક્યવિજયી ભવતિ સર્વસિદ્ધેશ્વરો ભવતિ ચિદાચાર્યમુખેન ગૃહ્ણીયાન્મહાકુબ્જિકામન્ત્રરાજં સર્વપાપૈઃ
પ્રમુચ્યતે સ કુબ્જિકાપ્રત્યક્ષદેવતાદર્શનં કરોતિ સ બ્રહ્મહત્યાં તરતિ સ વીરહત્યાં તરતિ સ ભ્રૂણહત્યાં તરતિ સ ગોહત્યાં તરતિ સ સ્ત્રીહત્યાં તરતિ સ બાલહત્યાં તરતિ સ સર્વહત્યાં તરતિ ગર્ભજન્મજરામરણતાપત્રયાત્મકં દુઃખં

તરતિ સ ખેચરતિ સ ખેચરત્વં પ્રાપ્નોત્યેવં વેદ ॥ ૨॥

અથ મહાકુબ્જિકાં ષોડશાક્ષરીં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં ભુવનેશ્વરીબીજમ્ ।
ભુવનેશ્વરીબીજં તુ વ્યોમજ્વલનેન્દિરા કલાબિન્દુમેલનરૂપા । તદ્વયમ્ । તતઃ ક્રોધબીજમ । ક્રોધબીજં તુ મહાલક્ષ્મીઃ ષષ્ઠસ્વરભૂષિતં નાદબિન્દુમિલિતમ્ । તદ્વયમ્ । નૃસિંહબીજમ્ । નૃસિંહબીજં તુ ક્ષેત્રપાલઃ પશ્ચિમાસ્યસ્વરભૂષિતં નાદબિન્દુયુતમ્ । તદ્વયમ્ । તતોઽઙ્કુશબીજમ્ । અઙ્કુશબીજં તુ મહાકાલં રેફારૂઢં જ્વાલામુખીભૂષિતં કલાબિન્દુમિલિતં બીજદ્વયં સમુચ્ચાર્ય મહાકુબ્જિકેત્યભિમુખગતા । તદનુ નૃસિંહબીજમઙ્કુશબીજં ભુવનેશ્વરીબીજમ્ ॥ ૩॥

ઇતિ શ્રીકુબ્જિકામહાવિદ્યેશ્વર્યા મહાષોડશાર્ણં મહામન્ત્રરાજં મહાશઙ્ખમાલયા
નિયમેન લતાપીઠે યો લક્ષમાવર્તયતિ સ વિશ્વાધીશો ભવતિ સ બ્રહ્મમયો ભવતિ સ રુદ્રેશ્વરઃ સ લોકેશ્વરઃ સ સર્વદેવેશ્વરો ભવતિ સ સર્વાન્ શત્રૂન્મારયતિ સ સર્વજ્ઞો ભવતિ સ સિદ્ધિકબ્જિકાપ્રિયો ભવતિ ॥ ૪॥

## ॥ ૪॥

અથ દ્વાવિંશત્યક્ષરીં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં પઞ્ચ લક્ષ્મીબીજમ્ । દ્વિતીયં ક્રોધબીજમ્ । ક્રોધબીજં તુ લક્ષ્મીર્હરષષ્ઠસ્વરભૂષિતં નાદબિન્દુમિલિતમ્ । તદ્વયમ્ । તતો ભુવનેશ્વરીબીજમ્ । ભુવનેશ્વરીબીજં તુ પ્રાણસન્ધિર્રેફારૂઢં મોહિનીસ્વરભૂષિતં નાદબિન્દુમિલિતમ્ । તદ્વયમ્ । તતો લક્ષ્મીબીજમ્ । લક્ષ્મીબીજં તુ કામરૂપં વન્હયારૂઢં બિન્દુમાલિનીભૂષિતં કલાબિન્દુમિલિતમ્ । તદ્વયમ્ । તતો નૃસિંહબીજમ્ । નૃસિંહબીજં તુ યુગાન્તકં બ્રહ્મસૂત્રભૂષિતં નાદબિન્દુમિલિતમ્ । તદ્વયમ્ । તતોઽઙ્કુશબીજમ્ । અઙ્કુશબીજં તુ મહાકાલી ત્રિપુરસુન્દર્યારૂઢં ત્રૈલોક્યવિજયસ્વરભૂષિતં નાદબિન્દુયુતં સમુચ્ચાર્ય કુબ્જિકેત્યભિમુખગતા । તદનુ મહાઙ્કુશબીજં નૃસિંહબીજદ્વયં કૂર્ચબીજદ્વયમિતિ દ્વાવિંશત્યક્ષરી ॥ ૧॥

મહાકુબ્જિકા યો જાનાતિ સ મહાનિર્વાણમાપ્નોતિ શુપુત્રકીર્તિજ્ઞાનૈશ્વર્યવાન્ભવતિ સ મહાકવિર્ભવતિ મહામેધાવી ભવતિ સ તર્કાગમપુરાણપાતઞ્જલસાઙ્ખ્યયોગમીમાંસાધર્મશાસ્ત્રવેદાન્તજ્યોતિષવ્યાકરણાલઙ્કારકાવ્યદિવ્યૌઘાધીશો ભવતિ સકલવેદાર્થભાષ્યકારકો ભવતિ સ મહાણિમાદ્યષ્ટસિદ્ધિ પ્રાપ્નોતિ સ સકલસામ્રાજ્યેશ્વરો ભવતિ સ સર્વમન્ત્રાર્થં જાનાતિ સ સર્વયન્ત્રાર્થં જાનાતિ સ સર્વદેવસમો ભવતિ સ સર્વદેવમયો ભવતિ સ સર્વમયો ભવતિ ॥ ૨॥

## ॥ ૫॥

અથ કુબ્જિકાપઞ્ચાક્ષરીં ષડક્ષરીં દ્વાદશાક્ષરીં મહાષ્ટાદશાક્ષરીં વ્યાખ્યાસ્યામઃ ॥

પ્રથમં પ્રાણેશો ધારા વારુણી વહ્નિશ્ચામુણ્ડા મહાવિદ્યેશ્વરીભૂષિતમ્ । પ્રથમં કૂટરાજં પઠિત્વા કુબ્જિકેત્યભિમુખગતા । તદનુ પરમાત્મા બ્રહ્મ પૃથ્વી વારુણી રેફ બિન્દુમાલિનીમિલિતમ્ । દ્વિતીયં કૂટરાજમ્ । તૃતીયં જગદ્બીજં ક્રોધીશઃ

પૃથ્વી માયાબીજમ ॥ ૧॥

ઇત્યેષા મહાકુબ્જિકાષ્ટાદશાક્ષરીં યો જાનાતિ સ મહાખેચરો ભવતિ સ બ્રહ્મમયો ભવતિ સ વિષ્ણુમયો ભવતિ સ રુદ્રમયો ભવતિ સ સર્વજ્ઞાનમયો ભવતિ સ તત્ત્વજ્ઞાનવાન્ભવતિ સ સર્વપ્રયોગસિદ્ધિમાપ્નોતિ સ સર્વમન્ત્રજાપકો ભવતિ સ સર્વયન્ત્રપૂજકો ભવત્યેવં વેદ ॥ ૨॥

ક્રોધબીજં સમુચ્ચાર્ય કુબ્જિકાયૈ પઠિત્વા બૃહદ્ભાનુજાયામુચ્ચરેત્ । ઇતિ સપ્તાક્ષરી મહાકુબ્જિકા ભવતિ ॥ ૩॥

એતસ્યા જ્ઞાનમાત્રેણ જીવન્મુક્તો ભવતિ સ મહાચક્રવર્તીન્દ્રો ભવતિ સ નવદ્વીપેશ્વરો ભવતિ ચતુઃસમુદ્રપર્યન્તં મહારાજ્યં પ્રાપ્નોતિ સાર્વભૌમો ભવતિ મહામહીપતીન્દ્રો ભવતિ સ મહારાજરાજેશ્વરો ભવતિ ॥ ૪॥

ક્રોધબીજં પઠિત્વા તુ તતોઽઙ્કુશં પઠેત્સદા ।
માયાબીજં પઠેત્તત્ર અસ્ત્રબીજં પઠેત્સુધીઃ ।
એષા પઞ્ચાક્ષરી વિદ્યા કુબ્જિકા યા પ્રકાશિતા ॥ ૫॥

એતસ્યા જ્ઞાનમાત્રેણ સકલસિદ્ધિભાગ્ભવતિ મહાસાર્વભૌમપદં પ્રાપ્નોત્યેવં વેદ ॥ ૬॥

માયાબીજં સમુચ્ચાર્ય કૂર્ચબીજં તતઃ પઠેત્ ।
લક્ષ્મીબીજં પઠેત્પશ્ચાત્કુબ્જિકે સિદ્ધિપૂર્વકમ્ ।
અન્તે કૂર્ચં વદેત્તત્ર નવાર્ણા કુબ્જિકા સ્મૃતા ॥ ૭॥

નવાર્ણાં કુબ્જિકાં યો જાનાતિ સ મહાભૈરવો ભવતિ સ પ્રત્યક્ષકુબ્જિકાદર્શનં
કરોતિ સ મન્ત્રસિદ્ધિં કુરુતે સ પ્રયોગસિદ્ધિં કુરુતે સ ખેચરત્વં પ્રાપ્નોત્યેવં વેદ ॥

પ્રણવં પૂર્વમુચ્ચાર્ય લક્ષ્મીબીજં પઠેત્તતઃ ।
કામરાજં પઠેત્પશ્ચાત્ક્રોધબીજં તતઃ પઠેત્ ॥ ૯॥

પ્રચણ્ડકુબ્જિકેઽપ્યત્ર માયાન્તે પરિકલ્પયેત્ ।
દ્વાદશાર્ણા મહાકુબ્જા સર્વવિદ્યાત્મિકા પરા ॥ ૧૦॥

એતસ્યા જ્ઞાનમાત્રેણ મન્ત્રસિદ્ધિઃ પ્રજાયતે ।
સત્યં સત્યં પુનઃ સત્યં સત્યં સત્યં પુનઃ પુનઃ ॥ ૧૧॥

ન હિ કુબ્જાસમા વિદ્યા ન હિ કુબ્જાસમા સ્તુતિઃ ।
ન હિ કુબ્જાસમો મન્ત્રો નાસ્તિ બ્રહ્માણ્ડગોલકે ॥ ૧૨॥

દ્વાદશાર્ણાં મહાકુબ્જિકાં યો જાનાતિ સ
નક્ષત્રાણાં યથા સોમો જ્યોતિષામિવ ભાસ્કરો ભાતિ સર્વેષુ લોકેષુ
સર્વેષુ દેવેષુ સર્વેષુ દેવેષ્વિતિ ॥ ૧૩॥

મહાકુબ્જિકે ધનપતિ ધનં મે દેહિ યશસ્પતિ યશો મે દેહિ સૌભાગ્યવતિ

સૌભાગ્યં મે દેહિ । રાજપુત્રો રાજ્યકામો મહારાજ્યં લભતે કન્યાઃ પતિકામાઃ
સુપતિં લભન્તે સ્ત્રિયઃ પુત્રકામાઃ સુપુત્રપૌત્રાન્લભન્તે શ્રોત્રિયાધ્યાપકાચાર્યત્વં
લભન્તે ॥ ૧૪॥

યો કુબ્જિકાં નિત્યમર્ચયતિ સ બ્રહ્મસમો ભૂત્વા સર્વાન્લોકાન્સંસૃજતિ સ વિષ્ણુસમો ભૂત્વા
સર્વાન્લોકાન્સર્વાનૃષીન્સર્વાત્માનં પાલયતિ સ રુદ્રસમો ભૂત્વા
સર્વાન્દેવાન્સર્વાન્લોકાન્સર્વાનૃષીન્સર્વાત્માનં સંહારયતિ સ મહાપ્રલયં કૃત્વા પુનઃ સૃષ્ટિં સ્થિતિં સંહારં કલ્પે કલ્પે સ
સર્વં કરોતિ સર્વાન્કામાનવાપ્નોતિ
સ સર્વાન્ભોગાનવાપ્નોતિ સ સર્વાન શત્રૂન્મારયતિ જૃમ્ભયતિ સ્તમ્ભયત્યુદકં સ
સોમં સ્તમ્ભયતિ સ સૂર્યં સ્તમ્ભયતિ સ સર્વં જયતીત્યેવં વેદ મહાકુબ્જિકાર્ચનતત્ત્વસારામૃતોપનિષત્ ॥ ૧૫॥

## ॥ ૬॥

પરમેષ્ઠીગુરું પૂજ્ય પરાપરગુરું યજેત્ ।
પરમગુરું તતઃ પૂજ્ય સ્વગુરું નિત્યમર્ચયેત્ ॥

એવં ગુરું પ્રપૂજ્યાદૌ પ્રાતઃકૃત્યાદિકં કુર્યાત્ ॥ ૧॥

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હવામહે ॥ ૨॥

ઉષાકાલે સમુત્થાય પ્રાતર્યાગં સમાચરેત ।
ઉષા દેવી વાચા સંવિદાના વાગ્દેવ્યુષસા સંવિદાના ॥ ૩॥

ઉષસ્પતિર્વાચસ્પતિના સંવિદાનો વાચસ્પતિરુષસ્પતિના સંવિદાનઃ ॥ ૪॥

ઇતિ મન્ત્રેણ સમયોદકેનાચમનં કૃત્વા સમયોદકં ધ્યાત્વા પીત્વા રાત્રિમાતરં
પ્રાર્થયેત્ ॥ ૫॥

રાત્રિ માતરુષસં નઃ પરિ દેહિ ।
ઉષા નો અહ્ને પરિ દદાદહસ્તુભ્યં વિભાવરિ ॥ ૬॥

રાત્રિં રાત્રિમરિષ્યન્ત તરેવ તન્વા વયમ્ ।
ગમ્ભીરમપ્લવા ઇવ ન તરેયુરરાતયઃ ॥ ૭॥

વયં તન્વા નિદ્રાવશાદ્રાત્રિં રાત્રિમિતિં પ્રતિરાત્રં પ્રતિમરિષ્યન્ત । યથારાતયઃ
શત્રવઃ પારે તિષ્ઠન્તિ અપ્લવા ગમ્ભીરમતરેયુઃ । ક ઇવ । તરેવ તરશબ્દેન પતઙ્ગોપલક્ષ્યતે । યથા પતઙ્ગો
દીપકં દૃષ્ટ્વા દીપમધ્યે સ્વદેહં દાહયતિ મરિષ્યતિ તથા વયં તન્વા નિદ્રયા મોહયતિ મરિષ્યતિ । કિમપિ કર્તું ન

શક્યતે શવવદ્ભાતિ । અપ્લવા ગમ્ભીરમતરેયુઃ । પ્લવમિતિ નૌકાં વિના યથા મહાગમ્ભીરસાગરં ન તરતિ તથા શ્રીકુબ્જિકારાધનં વિના સમ્યગ્વેદાર્થજ્ઞાનં વિના નિદ્રાહારભયમૈથુનં ન ત્યજતિ મહાજ્ઞાનાન્ધકારવશાત્સ સર્વં કરોતીત્યર્થઃ ॥ ૮॥

યે રાત્રિમનુતિષ્ઠન્તિ યે ચ ભૂતેષુ જાગ્રતિ ।
પશૂન્યે સર્વાનૃક્ષન્તિ તે ન આત્મસુ જાગ્રતિ તે ન પશુષુ જાગ્રતિ ॥ ૯॥

યે સાધકા રાત્રિમનુતિષ્ઠન્તિ રાત્રૌ જાગરણં કરોતિ યે મહાકુબ્જિકારાધનતત્પરા રાત્રી જાગરણં કૃત્વા મહાભૂતશુદ્ધિં કરોતિ તે ભૂતેષુ જાગ્રતિ તે પશુષુ જાગ્રતિ । યઃ પશુજાગરણં કરોતિ તે પશૂનૃક્ષન્તિ સ પશુવજ્જાગરણં કરોતિ તે પશુવદ્ભાતિ તે પશુત્વં પ્રાપ્નોતિ । યે રાત્રૌ જાગરણં કૃત્વા મહાપઞ્ચભૂતશુદ્ધિં (??પિપ્પલાદોઽઙ્ગિરાઃ સનત્કુમારશ્ચાથર્વણં ભગવન્તં પપ્રચ્છ ભગવાન્સનત્કુમારશ્ચાથર્વણ કુબ્જિકામહાપશ્ચિમામ્નાયેશ્વર્યાઃ કિં
મન્ત્રં કિં યન્ત્રં કેન તન્ત્રેણ પૂજનં ??not in the book) કૃત્વા ઇન્દ્રિયાણિ પશૂન્હત્વાત્માનં સમ્પૂજ્ય કુબ્જિકાદીક્ષાવાન્પુરુષઃ પરમાત્મનિ જાગ્રતિ પરમાત્મજ્ઞાનસિદ્ધિં પ્રાપ્નોત્યેવં વેદ કુબ્જિકોપનિષત્ ॥ ૧૦॥

અકામો ધીર અમૃતઃ સ્વયમ્ભૂ રસેન તૃપ્તો ન કુતશ્ચનોનઃ ।
તમેવ વિદ્વાન્ન વિભાય મૃત્યોરાત્માનં ધીરમજરં યુવાનમ્ ॥ ૧૧॥

નઃ આત્મકં પરમાત્માનં ષટ્ મધુરામ્લતિક્તકટુકષાયલવણષડ્રસેનાપિ ન તૃપ્તં સ્વયમ્ભૂ પુરુષમકામં ધીરમમૃતમયં પુરુષમમૃતવાચમમૃતમુખા વદન્તિ । તમજરં યુવાનં પરમાત્માનં વિદ્વાન્પણ્ડિતો વેદાર્થજ્ઞઃ પુરુષો મહાધીરો મૃત્યોઃ સકાશાન્ન વિભાવ્ય સમ્ભાવનાપિ ન વિદ્યતેત્યર્થઃ ॥ ૧૨॥

ત્વં સ્ત્રી ત્વં પુમાનસિ ત્વં કુમાર ઉત વા કુમારી ।
ત્વં જીર્ણો દણ્ડેન વઞ્ચસિ ત્વં જાતો ભવસિ વિશ્વતોમુખઃ ॥ ૧૩॥

તસ્માદ્વૈ વિદ્વાન્પુરુષમિદં બ્રહ્મેતિ મન્યતે ।
સર્વા હ્યસ્મિન્દેવતા ગાવો ગોષ્ઠ ઇવાસતે ॥ ૧૪॥

પ્રથમેન પ્રમારેણ ત્રેધા વિશ્વં વિગચ્છતિ ।
અજ એકેન ગચ્છત્યજ એકેન ગચ્છતીહૈકેન નિષેવતે ॥ ૧૫॥

એવં સ્વાત્માનં ગુરું સ્વેષ્ટદેવીં ચૈક્યં સમ્ભાવ્ય પ્રાતઃકૃતિં કુર્યાત્ । પરાશરેણોક્તં સમ્યગ્બ્રહ્મજ્ઞાનં વિના વેદમન્ત્રાર્થજ્ઞાનં વિના ન કુબ્જિકાં
યજેત્પ્રાતઃકૃત્યાદિકં ન કુર્યાત્ । તસ્માદ્બ્રહ્મજ્ઞાનસ્યાવશ્યકત્વમુક્તં પરાશરેણ
મહાથર્વણરહસ્યકુબ્જિકોપનિષદેઽપ્યુક્તં ય એવં વેદ
મહાકુબ્જિકોપનિષત્ ॥ ૧૬॥

# ॥ ૭॥

સહસ્રાબ્જચન્દ્રમણ્ડલમધ્યે ભ્રમરગુમ્ફિતગુહાયાં શ્રીસચ્ચિદાનન્દમયં પરબ્રહ્મસ્વરૂપં સ્વગુરું પરમગુરું પરાપરગુરું પરમેષ્ઠીગુરું વિલોમેન પશ્ચિમામ્નાયક્રમેણ સહસ્રાબ્જે મહાચક્રૈકચક્રે માનવૌઘાગુરું સિદ્ધૌઘાગુરું દિવ્યૌઘાગુરું દિવ્યરૂપં શિવશક્ત્યાત્મકમગ્નીષોમાત્મકં બ્રહ્મસ્વરૂપં પરમવ્યોમ્નિકં પઞ્ચભૂતજનકં સર્વદેવજનકં સર્વવેદજનકં સર્વેન્દ્રિયજનકં
સર્વતેજોજનકં સૃષ્ટિસ્થિતિસંહારકારકં
સ સૂર્યજનકં સ સોમજનકં સર્વજનકં સ સર્વજનકમિતિ ॥ ૧॥

સોમઃ પવતે જનિતા મતીનાં જનિતા દિવો જનિતા પૃથિવ્યાઃ ।
જનિતાગ્નેર્જનિતા સૂર્યસ્ય જનિતેન્દ્રસ્ય જનિતોત વિષ્ણોઃ ॥ ૨॥

સ વિષ્ણુજનકં સ રુદ્રજનકં સ બ્રહ્મજનકં સ ભૂર્ભુવઃસ્વર્જનકં
મહર્જનકં તપઃસત્યજનકમ્ । શ્રીગુરું શાન્તં સદાશિવં
બ્રહ્માદિવન્દિતં યોગિધ્યેયમ્ । તત્ર ન દુઃખં ન સુખમ્ । પ્રતિબુદ્ધઃ સર્વતઃ સ્વયં વિભાતિ ॥ ૩॥

ન તત્ર ચન્દ્રાર્કવપુઃ પ્રકાશતે ન વાન્તિ વાતા ન ચ યાન્તિ દેવતાઃ ।
યત્ર દેવઃ ક્રતુભિર્ભૂતભાવનઃ સ્વયં વિભૂત્યા વિરજઃ પ્રકાશતે ॥ ૪॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દતારકં નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ નિત્યં તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૫॥

દિવ્યો હ્યમૂર્તિઃ પુરુષઃ સબાહ્યાભ્યન્તરે હ્યજઃ ।
અપ્રાણો હ્યમનાઃ શુભ્રોઽક્ષરાત્પરતઃ પરઃ ॥ ૬॥

તત્પરં બ્રહ્મ પરિપૂર્ણં નિત્યં નિરઞ્જનમદ્વયમ્ । તત્ત્વમસિ । અહં બ્રહ્માસ્મિ ।
અયમાત્મા બ્રહ્મ । યોઽસાવાદિત્યે પુરુષઃ સોઽસાવહમ્ । ખં બ્રહ્મરૂપં શ્રીગુરું
સહસ્રદલમહાચક્રૈકચક્રરાજે મહાચન્દ્રપીઠે સ્વગુરું ધ્યાયેત્ ॥ ૭॥

એકચક્રં વર્તત એકનેમિ સહસ્રાક્ષરં પ્ર પુરો નિ પશ્ચાત્ ।
અર્ધેન વિશ્વં ભુવનં જજાન યદસ્યાર્ધં ગુરુરૂપમુગ્રમ્ ॥ ૮॥

ઊર્ધ્વઃ સુપ્તેષુ જાગર નનુ તિર્યઙ્ગિપદ્યતે
ન સુપ્તમસ્ય સુપ્તેષ્વનુ શુશ્રાવ કશ્ચન ॥

શિવશક્ત્યાત્મકં શ્રીગુરું ધ્યાયેત્ ॥ ૯॥

યદસ્ય દક્ષિણમક્ષ સ ઉ સ આદિત્યો યદસ્ય સવ્યમક્ષ સ ઉ સ ચન્દ્રમાઃ ।
યોઽસ્ય દક્ષિણઃ કર્ણો હિ સોઽગ્નિર્યોઽસ્ય સવ્યઃ કર્ણો હિ સ પવમાનઃ ।

અહોરાત્રે નાસિકે દિતિશ્ચાદિતિશ્ચ શીર્ષકપાલે સંવત્સરઃ શિરઃ ॥ ૧૦॥

બ્રહ્માસ્ય શીર્ષં બૃહદસ્ય પૃષ્ઠં વામદેવ્યમુદરમોદનસ્ય ।
છન્દાંસિ પક્ષૌ મુખમસ્ય સત્યં વિષ્ટારી જાતસ્તપસોઽધિ યજ્ઞઃ ॥ ૧૧॥

તસ્યૌદનસ્ય બૃહસ્પતિઃ શિરો બ્રહ્મ મુખમ્ ॥ ૧૨॥

દ્યાવાપૃથિવી શ્રોત્રે સૂર્યાચન્દ્રમસાવક્ષિણી સપ્ત ઋષયઃ પ્રાણાપાનાઃ ॥ ૧૩॥

પ્રાણમાહુર્માતરિશ્વાનં વાતો હ પ્રાણમુચ્યતે ।
પ્રાણે હ ભૂતં ભવ્યં ચ પ્રાણે સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૪॥

સૂર્યશ્ચક્ષુર્વાતઃ પ્રાણોઽન્તરિક્ષમાત્મા પૃથિવી શરીરમ્ ।
અસ્તૃતો નામાહમયમસ્મિ સ આત્માનં નિદધે દ્યાવાપૃથિવીભ્યાં
ગોપીથાય ॥ ૧૫॥

તસ્માદ્વૈ વિદ્વાન્પુરુષમિદં બ્રહ્મેતિ મન્યતે ॥ ૧૬॥

બ્રહ્માપરં યુજ્યતાં બ્રહ્મ પૂર્વં બ્રહ્માન્તતો મધ્યતો બ્રહ્મ સર્વજઃ ॥ ૧૭॥

તત્પરં બ્રહ્મ તત્સત્યં તત્સલિલં તદવ્યક્તં તદસ્પર્શં તદરૂપં
તદગન્ધં તદરસં
તદમૃતમ્ । તન્નિષ્ઠો ભૂતાત્મા સૈષા પઞ્ચમહાભૂતઃ ॥ ૧૮॥

પ્રકૃતિજનક શ્રીપરમેષ્ઠીગુરું સચ્ચિદાનન્દરૂપં ધ્યાત્વા
માનસાદ્યુપચારૈઃ સમ્પૂજ્ય
સઞ્જપ્ય તર્પ્ય સમર્પ્ય શ્રીસિદ્ધિકુબ્જિકારૂપં સ્વગુરું ધ્યાત્વા સ્વાત્માનં ગુરુ
સ્વેષ્ટદેવીં ચૈક્યં જ્ઞાત્વા પ્રાર્થયેત્ ॥ ૧૯॥

કુબ્જિકા પરમેષ્ઠિની વાગ્દેવી બ્રહ્મસંશ્રિતા ।
યયૈવ સસૃજે ઘોરં તયૈવ શાન્તિરસ્તુ નઃ ॥ ૨૦॥

ઇદં યત્પરમેષ્ઠિનં મનો વાં બ્રહ્મસંશ્રિતમ ।
યેનૈવ સસૃજે ઘોરં તેનૈવ શાન્તિરસ્તુ નઃ ॥ ૨૧॥

ઇમાનિ યાનિ પઞ્ચેન્દ્રિયાનિ મનઃષષ્ઠાનિ મે હૃદિ બ્રહ્મણા સંશ્રિતાનિ ।
યૈરેવ સસૃજે ઘોર તૈરેવ શાન્તિરસ્તુ નઃ ॥ ૨૨॥

અષ્ટાવિંશાનિ શિવાનિ શગ્માનિ સહ યોગં ભજન્તુ મે ।
યોગં પ્રપદ્યે ક્ષેમં ચ ક્ષેમં પ્રપદ્યે યોગં ચ નમોઽહોરાત્રાભ્યામસ્તુ ॥

ઇતિ સમ્પ્રાર્થ્ય કુલવૃક્ષં પ્રણમ્ય ॥ ૨૩॥

મધુમન્મૂલં મધુમદગ્રમાસાં મધુમન્મધ્યં વીરુધાં બભૂવ ।
મધુમત્પર્ણં મધુમત્પુષ્પમાસાં મધોઃ સમ્ભક્તા અમૃતં
ધૃતમન્નં દુહ્રતાં કુબ્જિકાત્મકમ્ ॥

કુલવૃક્ષં પ્રણમ્યાજપં સમર્પયેત્ ॥ ૨૪॥

અજપા વૈષ્ણવી માયા જપ્યેન સાજિતા પરા ।
કુબ્જિકા બ્રહ્મવિદ્યા સા યા વેદૈરુપગીયતે ॥ ૨૫॥

અનાખ્યેયમિદં ગુહ્યં યોગીકેશસમં નિભમ્ ।
હંસસ્ય ગતિવિસ્તારં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૬॥

હંસ પરમહંસનિર્વાણં વ્યાખ્યાસ્યામઃ ॥ બ્રહ્મચારિણે
શાન્તાય ગુરુભક્તાય કુબ્જિકાસાધકાય પ્રકાશયેત્ । શઠાય
ગુરુમન્ત્રયન્ત્રતન્ત્રમાર્ગનિન્દકાય ન દર્શયેત્ ॥ ૨૭॥

હંસઃ પરમાત્મા પરં જ્યોતિઃ સર્વેષુ દેહેષુ કીટકપતઙ્ગાદિષુ દેહેષુ
વ્યાપ્નોતિ । યથા
કાષ્ઠે હ્યગ્નિસ્તિલેષુ તૈલમિવ તં વિદિત્વાતિ મૃત્યુમેતિ । નાન્યઃ પરમપન્થા
વિદ્યતેઽયનાય ॥ ૨૮॥

આધારાદ્વાયુમુત્થાપ્ય સ્વાધિષ્ઠાનં ત્રિઃ પ્રદક્ષિણીકૃત્ય મણિપૂરં
ગત્વાનાહતમતિક્રમ્ય વિશુદ્ધૌ પ્રાણાન્નિરુધ્યાજ્ઞાચક્રે દ્વિદલે
હક્ષદ્વિતત્ત્વમયે વર્ણમયે સ્થિત્વા
બ્રહ્મરન્ધ્રં ધ્યાયન્ ત્રિમાત્રોઽહમિત્યેવં સર્વદા ધ્યાયન્નાદમાદાય
હંસેતિ કુણ્ડલિનીમુત્થાપ્ય સોઽહમિતિ મન્ત્રેણ પરમશિવેન સહ સંયોજ્ય
બ્રહ્મરન્ધ્રપર્યન્તં
શુદ્ધસ્ફટિકસઙ્કાશં નિરાભાસં પરમગુરું ધ્યાયેત્ ॥ ૨૯॥

ન તત્ર ચન્દ્રાર્કવપુઃ પ્રકાશતે ન વાન્તિ વાતા ન ચ યાન્તિ દેવતાઃ ।
યત્ર દેવઃ ક્રતુભિર્ભૂતભાવનઃ સ્વયં વિભૂત્યા વિરજઃ પ્રકાશતે ॥ ૩૦॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દતારકં નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।
તમેવ ભાતિમનુભાતિ સર્વં તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૩૧॥

હંસ ઋષિઃ । અવ્યક્તગાયત્રી છન્દઃ । પરમહંસો દેવતા । હમિતિ
બીજકમ્ । સમિતિ શક્તિઃ । સોઽહમિતિ કીલકમ્ । અદ્યાહોરાત્રયોર્મધ્યે

શ્વાસોચ્છ્વાસરૂપેણ
એકવિંશતિસહસ્રાણિ ષટ્શતાન્યધિકાનિ ભવન્તિ ॥ ૩૨॥

સૂર્યાય સોમાય ગણેશાય નિરઞ્જનાય નિરાભાસાય તનુ સૂક્ષ્મઃ
પ્રચોદયાદિત્યગ્નીષોમાભ્યાં વૌષટ્ હૃદયાદ્યઙ્ગન્યાસકરન્યાસૌ
ભવતઃ ॥ ૩૩॥

એવં કૃત્વા હૃદયેઽષ્ટદલે હંસાત્માનં ધ્યાયેત્ ॥ અગ્નીષોમૌ પક્ષૌ
। ઓઙ્કારઃ
શિરો બિન્દુર્નેત્રં સત્યં મુખં કુબ્જેશ્વરમહાકુબ્જિકાશ્ચરણૌ બાહૌ
મહાકાલકરાલૌ
દ્વૌ શિખા પ્રજાપતિઃ ॥ ૩૪॥

પ્રજાપતિશ્ચ પરમેષ્ઠી ચ શ‍ૃઙ્ગે ઇન્દ્રઃ
શિરો અગ્નિર્લલાટં યમઃ કૃકાટમ્ ॥ ૩૫॥

સોમો રાજા મસ્તિષ્કો દ્યૌરુત્તરહનુઃ પૃથિવ્યધરહનુઃ ॥ ૩૬॥

વિદ્યુજ્જિહ્વા મરુતો દન્તા રેવતીઈવાઃ કૃત્તિકા સ્કન્ધા ઘર્મો વહઃ ॥ ૩૭॥

વિશ્વં વાયુઃ સ્વર્ગો લોકઃ કૃષ્ણદં વિધરણી નિવેષ્યઃ ॥ ૩૮॥

શ્યેનઃ ક્રોડોઽન્તરિક્ષં પાજસ્યં બૃહસ્પતિઃ કકુધતીઃ કીકસાઃ ॥ ૩૯॥

દેવાનાં પત્નીઃ પૃષ્ટય ઉપસદઃ પર્શવઃ ॥ ૪૦॥

મિત્રશ્ચ વરુણશ્ચાંસૌ ત્વષ્ટા ચાર્યમા ચ દોષણી મહાદેવો બાહૂ ॥ ૪૧॥

ઇન્દ્રાણી ભસદ્વાયુઃ પુચ્છં પવમાનો વાલાઃ ॥ ૪૨॥

બ્રહ્મ ચ ક્ષત્રં ચ શ્રોણી બલમૂરૂ ॥ ૪૩॥

ધાતા ચ સવિતા ચાષ્ઠીવન્તૌ જઙ્ઘા ગન્ધર્વા અપ્સરસઃ કુષ્ઠિકા
અદિતિઃ શફાઃ ॥ ૪૪॥

ચેતો હૃદયં યકૃન્મેધા વ્રતં પુરીતત્ ॥ ૪૫॥

ક્ષુત્કુક્ષિરિરા વનિષ્ઠઃ પર્વતાઃ લાશયઃ ॥ ૪૬॥

ક્રોધો વૃક્કૌ મન્યુરાણ્ડૌ પ્રજાઃ શેપઃ ॥ ૪૭॥

નદી સૂત્રી વર્ષસ્ય પતય સ્તના સ્તનયિત્નુરૂધઃ ॥ ૪૮॥

વિશ્વવ્યચાશ્ચર્મૌષધયો લોમાનિ નક્ષત્રાણિ રૂપમ્ ॥ ૪૯॥

દેવજના ગુદા મનુષ્યા આન્ત્રાણ્યત્રા ઉદરમ્ ॥ ૫૦॥

રક્ષાંસિ લોહિતમિતર્જના વવન્ધમ્ ॥ ૫૧॥

અભ્રં પીબો મજ્જા નિધનમ ॥ ૫૨॥

અગ્નિરાસીન ઉત્થિતોઽશ્વિના ॥ ૫૩॥

ઇન્દ્રઃ પ્રાઙ્તિષ્ઠન્દક્ષિણા તિષ્ઠન્યમઃ ॥ ૫૪॥

પ્રત્યઙ્તિષ્ઠન્ધાતોદઙ્તિષ્ઠન્સવિતા ॥ ૫૫॥

તૃણાનિ પ્રાપ્તઃ સોમો રાજા ॥ ૫૬॥

મિત્ર ઈક્ષમાણ આવૃત્ત આનન્દઃ ॥ ૫૭॥

યુજ્યમાનો વૈશ્વદેવો યુક્તઃ પ્રજાપતિર્વિમુક્તઃ સર્વમ્ ॥ ૫૮॥

એતદ્વૈ વિશ્વરૂપં સર્વરૂપં ગોરૂપમ્ ॥ ૫૯॥

ઉપૈનં વિશ્વરૂપાત્સર્વરૂપાઃ પશવસ્તિષ્ઠન્તિ ય એવં વેદ ॥ ૬૦॥

પરમહંસો ભાનુકોટિપ્રતીકાશો યેનેદં વ્યાપ્તં ભુવનં ભૂતં
ભવદ્ભવિષ્યાદિ ॥ ૬૧॥

મૂલાધારે ચતુર્દલે ૐ ગં ગણપતયે નમઃ । વં શં ષં સં બીજાત્મને નમઃ ।
સ્વાધિષ્ઠાનષડ્દલચક્રાય નમઃ । બં ભં મં યં રં લં બીજાત્મને નમઃ । મણિપૂરચક્રાય નમઃ । દિગ્દલે ડં ઢં ણં તં થં દં ધં નં પં ફં બીજાત્મને નમઃ ।
અનાહતચક્રાય નમઃ । શ્રીસૂર્યદલે ક ખ ગ ઘ ઙ ચ છ જ ઝં અં ટં ઠં
બીજપુરુષાય નમઃ । વિશુદ્ધચક્રાય નમઃ । ષોડશદલે અં આ ઇ ઈ ઉ ઊ ઋ ૠ
લં લૂ એ ઐ ૐ ઔં અં અઃ બીજપુરુષાય નમઃ । આજ્ઞાચક્રાય નમઃ । પદ્મદલે
હ ક્ષ દ્વિવર્ણમન્ત્રાસનસ્થાય હંસઃપરમાત્મને નમઃ ॥ ૬૨॥

પૂર્વદલે પુણ્યમતિઃ । આગ્નેય્યાં નિદ્રાલસ્યાદયો ભવન્તિ । યામ્યે ક્રૂરમતિર્ભવતિ ।
નૈરૃત્યે યદા હંસઃ પરમાત્મા તિષ્ઠતિ તદા પાપમતિર્ભવતિ મહાપઞ્ચપાતકાનિ કરોતિ । વારુણ્યાં હંસો યદા યાતિ તદા રત્યાદિચુમ્બનાલિઙ્ગનં કરોતિ ।
ગીતવાદ્યનૃત્યાદિનાનાવિધિક્રીડાકરણેચ્છા ભવતિ । વાયવ્યે ગમનાદૌ બુદ્ધિઃ ।
સૌમ્યે રતિપ્રીતિઃ । ઈશાને જપપૂજાદાનકરણેચ્છા ભવતિ । મધ્યે હંસો યદા
યાતિ તદા મહાવૈરાગ્યં ચોત્પદ્યતે । મૃત્તિકેત્યેવ સત્યમ્ ॥ ૬૩॥

સર્વં ભસ્મ । અગ્નિરિતિ ભસ્મ । વાયુરિતિ ભસ્મ । જલમિતિ ભસ્મ । સ્થલમિતિ
ભસ્મ । સર્વં હ વા ઇદં ભૂતં ભવદ્ભવિષ્યત્સર્વં સ્થાવરજઙ્ગમં સર્વં ભસ્મ । ન એતાનિ
ચક્ષૂંસિ યસ્માદ્વ્રતમિદં પાશુપતં યદ્ભસ્મનાઙ્ગાનિ સંસ્પૃશેત્તદેતત્પશુપાશવિમોક્ષણાય તદ્ભસ્મધારણં કરોતિ ॥
૬૪॥

સ્વપ્નમાયાસ્વરૂપેણ સૃષ્ટિરન્યૈર્વિકલ્પિતા ।
ઇચ્છામાત્ર પ્રભોઃ સૃષ્ટિરિતિ સૃષ્ટિર્વિકલ્પિતા ॥ ૬૫॥

અર્ધમાત્રાત્મકેનેદં વિશ્વં વ્યાપ્ય વ્યવસ્થિતા ॥ ૬૬॥

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ।
કાર્યકારણતાં હિત્વા પૂર્ણબોધોઽવશિષ્યતે ॥ ૬૭॥

યદા ચક્રમધ્યે હંસઃ પરમાત્મા યાતિ તદા મહાવૈરાગ્યવશાદ્બ્રહ્મજ્ઞાનં ચોત્પદ્યતે
સદ્બ્રહ્મમયો ભવતિ । કેસરે યદા હંસાત્મા યાતિ તદા જાગ્રદવસ્થાવશાદ્વિશ્વં
વ્યાપ્ય વિશ્વરૂપેણ વિરાડ્રૂપેણ તિષ્ઠતિ ॥ ૬૮॥

વિરાડ્વાગ્નિર્વિરાટ્પૃથિવી વિરાડન્તરિક્ષં વિરાટપ્રજાપતિઃ । વિરામૃત્યુઃ સાધ્યાનામધિરાજો બભૂવ તસ્ય ભૂતં ભવ્યં
વશે સ મે ભૂતં ભવ્યં વશે કૃણોતુ ॥

કર્ણિકામધ્યે હંસાત્મા યદા યાતિ તદા સ્વપ્નવશાદ્ધિરણ્યગર્ભો ભવતિ ॥ ૭૦॥

હિરણ્યગર્ભઃ સમવર્તતાગ્રે ભૂતસ્ય જાતઃ પતિરેક આસીત્ ।
સ દાધાર પૃથિવીમુત દ્યાં કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૭૧॥

આપો અગ્રે વિશ્વભાવાદ્ ગર્ભં દધાના અમૃતા શતજ્ઞાઃ ।
યાસુ દેવીષ્વધિ દેવ આસીત્કસ્મૈ દેવાય હવિષા વિધેમ ॥ ૭૨॥

લિઙ્ગે યદા હંસાત્મા યાતિ તદા સુષુપ્તિવશાત્સર્વં શૂન્યમિદં જગત્ । ૐ ખં બ્રહ્મમયો ભવતિ ॥ યદા હંસાત્મા
પદ્મત્યાગં કરોતિ તદા તુરીયાવસ્થાવશાદ્બ્રહ્માસ્મ્યહં
બ્રહ્માસ્મિ । તત્ત્વમસીતિ નિશ્ચયાર્થઃ પ્રતિપાદયતિ ॥ ૭૩॥

સ્વયં માતા પિતા પ્રોક્તાઃ સ્વયં ભ્રાતા સ્વયં ગુરુઃ ॥

સચરાચરં સ્વયં વ્યાપ્તં તત્ત્વમસીતિ સ્વયં સ્વયં તત્ત્વમસીતિ સ્વયં સ્વયમિત્યર્થઃ ॥

યદા હંસો નાદે લીનો ભવતિ તદા તુરીયાતીતાવસ્થાવશાન્નિરાભાસ નિરઞ્જનં
નિર્વિકલ્પં ચિન્મયં ચિદ્રૂપં ચિદાકારં નિત્યં જ્યોતિરૂપમણુરૂપં ભાતિ ॥ ૭૫॥

ચત્વારિ વાક્પરિમિતા પદાનિ તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ ।
ગુહા ત્રીણિ નિહિતા નેઙ્ગયન્તિ તુરીયં વાચો મનુષ્યા વદન્તિ ॥ ૭૬॥

ય એતાં તુરીયરૂપાં તુરીયાતીતાં મહાકુબ્જિકા પશ્ચિમસિંહાસનસ્થાં મહાપઞ્ચપ્રેતાસનાં મહાઘોરાં સિદ્ધિકુબ્જિકાં કૂટમન્ત્રાસનાં મહાકૂટેશ્વરીકુબ્જિકાં સ્વહૃધયે
પૂજાચક્ર સમ્ભાવ્ય માનસાદ્યુપચારૈઃ સમભ્યર્ચ્ય સઞ્જપ્ય તર્પ્ય સમમ્ ॥ ૭૭॥

ૐ હ સ ખ ફ્રે ૐ પરમેષ્ઠીગુરુપાદુકાં પૂજયામિ નમઃ સ્વાહેતિ મન્ત્રેણ
પરમેષ્ઠીગુરુ પૂજયેત્ । ઐં હસં સ્ફ્રેં ઐં પરાપરગુરુપાદુકાં પૂજયામિ ઇત્યનેન
પરાપરગુરું પૂજયેત્ । શ્રીં હ્રીં હ્સફ્રેં શ્રીં હ્રીં પરમગુરુપાદુકાં પૂજયામિ ઇત્યનેન
પરમગુરુ પૂજયેત્ । હસં કહ હસં ખ્ફ્રેં શં કહ ઇતિ મન્ત્રેણ કુબ્જેશાનન્દનાથ
શ્રીગુરુ શ્રીસિદ્ધિકુબ્જામ્બાપાદુકાં પૂજયામિ । ૐ નમઃ સ્વાહેતિ મન્ત્રેણ શ્રીગુરુ
સમભ્યર્ચ્ય । ઋલ વ ર યૂં ઇતિ સિદ્ધિકૂટેન દિવ્યૌઘાગુરું સમભ્યર્ચ્ય । શ્ક હૂ
ખ્ફ્રેં ઙ્ક હ ઇતિ મન્ત્રેણ સિદ્ધૌઘાગુરું સમ્પૂજ્ય । ક ચ ટ વ ર યી મન્ત્રેણ
માનવૌઘાગુરુ સમ્પૂજ્યાનુલોમવિલોમેન નવધા સમ્પૂજયેત્ ॥ ૭૮॥

ૐ કુબ્જિકાદેવ્યૈ વિદ્મહે કુલદીપાયૈ ધીમહિ હ્રીં તન્નઃ કુબ્જિઃ પ્રચોદયાત્ ॥

મહાકુબ્જિકાગાયત્રીમન્ત્રેણ મહાકુબ્જિકાં પૂજયેત્ ॥ ૭૯॥

ૐ બ્રહ્મવિષ્ણુમહેશ્વરાદિ ઋષિઃ । ગાયત્ર્યુષ્ણિગનુષ્ટુબ્બૃહતીપઙ્ક્તિત્રિષ્ટુબ્જગત્યાદિ
છન્દાંસિ । રુદ્રકુબ્જિકામહાકુબ્જિકાવીરકુબ્જિકાશ્મશાનકુબ્જિકાગુહ્યકુબ્જિકાસિદ્ધિકુબ્જિકાભીમકુબ્જિકાભદ્રકુબ્જિકાપ્રચણ્ડ
દેવતા । હૃદયે વિનિયોગઃ ॥ ૮૦॥

હૃદિસ્થા કાલિકા વિદ્યા મહાકુબ્જા હૃદિ સ્થિતા ।
સિદ્ધિકુબ્જા મહાવિદ્યા કુબ્જાનાથેન સેવિતા ॥ ૮૧॥

કુબ્જેશ્વરં વિરૂપાક્ષં નીલકણ્ઠં ત્રિલોચનમ ।
ઊર્ધ્વકેશં જ્યોતિરૂપં વ્યાલયજ્ઞોપવીતકમ્ ॥ ૮૨॥

સહસ્રશીર્ષ રુદ્રં સહસ્રાક્ષં વિશ્વશમ્ભુવમ્ ।
વિશ્વતઃ પરમં વિશ્વં કુબ્જેશં વિશ્વતોમુખમ્ ॥ ૮૩॥

ગજચર્મપરીધાનં પશ્ચિમાભિમુખે સ્થિતમ્ ।
દેવં ભવં પશુપતિં શિવમ્ ।
કુબ્જેશ્વર મહાદેવં સર્વમુગ્રં શિખણ્ડિનમ્ ॥ ૮૪॥

સહસ્રાક્ષઃ સહસ્રપાત્સહસ્રશીર્ષા પુરુષમ્ ।
સહસ્રબાહુભૂષિતં કુબ્જેશ્વરમ્ ॥ ૮૫॥

ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનામ્ ।

બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિઃ શિવો મેઽસ્તુ સદાશિવોમ્ ॥ ૮૬॥

ૐ જ્યોતીરૂપાય વિદ્મહે પરબ્રહ્મેશ્વરાય ધીમહિ તન્નઃ કુબ્જેશ્વરઃ પ્રચોદયાત્ ॥

ઇત્યનેન કુબ્જેશ્વરં સમભ્યર્ચ્ય સઞ્જપ્ય તર્પ્ય સમર્પ્ય પ્રણમેત્ ॥ ૮૭॥

નમઃ સાયં નમઃ પ્રાતર્નમો રાત્રૌ નમો દિવા ।
શિવાય ચ કુબ્જાય ચોભાભ્યામકરં નમઃ ॥

ઇતિ કુબ્જેશ્વરં પ્રણમ્ય પૃથિવીં પ્રણમેત્ ॥ ૮૮॥

પૃથિવ્યામગ્નયે સમનમન્ત્સ આઓત્ ।
યથા પૃથિવ્યામગ્નયે સમનમન્નેવા મહ્યં સન્નમઃ સન્નમન્તુ ॥ ૮૯॥

પૃથિવી ધેનુસ્તસ્યા અગ્નિર્વત્સઃ । સા મેઽગ્નિના વત્સેનેષમૂર્જં કામં દુહામ્ ।
આયુઃ પ્રથમ પ્રજા પોષં રયિં સ્વાહા ॥ ૯૦॥

અન્તરિક્ષે વાયવે સમનમન્ત્સ આઓત ।
યથાન્તરિક્ષે વાયવે સમનમન્નેવા મહ્યં સન્નમઃ સન્નમન્તુ ॥ ૯૧॥

અન્તરિક્ષં ધેનુસ્તસ્યા વાયુર્વત્સઃ । સા મે વાયુના વત્સેનેષમૂર્જં કામં દુહામ્ ।
આયુઃ પ્રથમં પ્રજાં પોષં રયિં સ્વાહા ॥ ૯૨॥

દિવ્યાદિત્યાય સમનમન્ત્સ આઓત ।
યથા દિવ્યાદિત્યાય સમનમન્નેવા મહ્યં સન્નમઃ સન્નમન્તુ ॥ ૯૩॥

દ્યૌર્ધેનુસ્તસ્યા આદિત્યો વત્સઃ । સા મ આદિત્યેન વત્સેનેષમૂર્જં કામં દુહામ્ ।
આયુઃ પ્રથમં પ્રજાં પોષં રયિં સ્વાહા ॥ ૯૪॥

દિક્ષુ ચન્દ્રાય સમનમન્ત્સ આધોત ।
યથા દિક્ષુ ચન્દ્રાય સમનમન્નેવા મહ્યં સન્નમઃ સન્નમન્તુ ॥ ૯૫॥

દિશો ધેનવસ્તાસાં ચન્દ્રો વત્સઃ । તા મે ચન્દ્રેણ વત્સેનેષમૂર્જં કામં દુહામ્ ।
આયુઃ પ્રથમં પ્રજા પોષં રયિં સ્વાહા ॥ ૯૬॥

અગ્નાવગ્નિશ્ચરતિ પ્રવિષ્ટ ઋષીણાં પુત્રો અભિશસ્તિપા ઉ ।
નમસ્કારેણ નમસા તે જુહોમિ મા દેવાનાં મિથુયા કર્મ ભાગમ્ ॥

ઇતિ મન્ત્રેણ નમસ્કારં કુર્યાત્ ॥ ૯૭॥

સ્વાત્માનં ગુરું સ્વેષ્ટદેવીં ચૈક્યં સમ્ભાવ્ય કુબ્જેશ્વરોઽહં મહાકુબ્જિકાસ્વરૂપોઽહં

નિરઞ્જનોઽહં નિરાકારોઽહં નિર્વિકલ્પોઽહં તત્ત્વરૂપોઽહં તત્ત્વમસિ । અયમાત્મા બ્રહ્મ યોઽસાવાદિત્યેકપુરુષઃ સોઽસાવહ ૐ ખં બ્રહ્મરૂપોઽહમિત્યેવં
સમ્ભાવ્ય સ્નાનાર્થં બહિર્નિર્ગચ્છેદિતિ વદન્તિ બ્રહ્મવાદિનઃ ॥ ૯૮॥

શ્રીસિદ્ધિકુજિકાં શૂન્યાલયે શ્મશાને નદીતીરે ગોપીતે પર્વતેઽપ્યેકલિઙ્ગે ગઙ્ગાગર્ભે લતાગૃહે મહાપીઠોપપીઠે પૂર્ણગિરિપીઠે મહોડ્યાનપીઠે જાલન્ધરપીઠે
મહાકામરૂપે વૃષશૂન્યશિવાલયે સ્વયમ્ભુસદાશિવસન્નિધાને નિયમેનાનિયમેન
વા મહાશઙ્ખમાલયા વા વર્ણમાલયા યો લક્ષમાવર્તયતિ સ વિશ્વાધીશો ભવતિ
સ ત્રૈલોક્યાધીશો ભવતિ સ બ્રહ્મમયો ભવતિ સ તત્ત્વમયો ભવતિ સ સર્વદેવમયો
ભવતિ સ સર્વદેવમયો ભવતીતિ ॥ ૯૯॥

## ॥ ૮॥

કુબ્જેશ્વરં યજેદ્વામે કુજિકાં દક્ષિણે યજેત્ ॥ ૧॥

યે પુરુષે બ્રહ્મ વિદુસ્તે વિદુઃ પરમેષ્ઠિનમ્ ।
યો વેદ પરમેષ્ઠિનં યશ્ચ વેદ પ્રજાપતિમ્ ॥ ૨॥

પ્રજાપતિરબ્રાવીત ॥ પ્રણવસ્ય ચોત્પત્તિર્વિપ્રો યો ન જાનાતિ તત્પુનરુપનયનમ્ ।
પ્રણવસ્ય ચોત્પત્તિઃ કુબ્જિકોપાસકો યો ન જાનાતિ સ કથં કુબ્જિકારાધનં
કરોતિ સહસ્રાબ્દકોટિલક્ષપુરશ્ચરણેનાપિ ન મન્ત્રસિદ્ધિર્ભવતિ । તસ્માન્મહાકુજિકોપાસકો સર્વથા પ્રણવોત્પત્તિજ્ઞાનં પ્રણવાર્થજ્ઞાનં કર્તવ્યમિતિ ॥ ૩॥

પ્રણવાર્થજ્ઞાનં વિના મહાવિદ્યાં ન યજેદિતિ બ્રહ્મવાદિનઃ । ચતુર્ણાં વેદાનામાદિપૂર્વા ૐ ભૂર્ભુવઃસ્વરિતિ વ્યાહૃતયો ભવન્તિ । સર્વમન્ત્રાણામાદિપૂર્વ ઓઙ્કારો
ભવતિ । ઓઙ્કારાદ્યા વિદ્યા બ્રહ્મવિદ્યોચ્યતે ॥ ૪॥

ઓઙ્કારં પૃચ્છામઃ ॥ કો ધાતુઃ કિં પ્રાતિપદિકં કિં નામાખ્યાતં કિં લિઙ્ગ કિ
વચનં કા વિભક્તિઃ કઃ પ્રત્યયઃ કઃ સ્વર ઉપસર્ગો નિપાતઃ કિં વૈ વ્યાકરણ
કો વિકારઃ કો વિકારી કતિમાત્રઃ કત્યક્ષરઃ કતિપદઃ કઃ સંયોગઃ કિ
સ્થાનાનુપ્રદાનકરણં શિક્ષુકાઃ કિમુચ્ચારયન્તિ કિં છન્દઃ કો વર્ણ ઇતિ પૂર્વે
પ્રશ્નાઃ । અથોત્તરે મન્ત્રઃ કલ્પો બ્રાહ્મણમૃગ્યજુઃ સામ । કસ્માદ્બ્રહ્મવાદિન ઓઙ્કા
રમાદિતઃ કુર્વન્તિ । કિ દૈવતં કિ જ્યોતિષં કિ નિરુક્તં કિ સ્થાન કા પ્રકૃતિઃ
કિમધ્યાત્મમિતિ ષટ્ત્રિંશત્પ્રશ્નાઃ । પૂર્વોત્તરાણાં ત્રયો વર્ગા દ્વાદશકા એતૈરોઙ્કાર
વ્યાખ્યાસ્યામઃ ॥ ૫॥

ૐ ઇત્યેતદક્ષરસ્ય પાદાશ્ચત્વારો વેદાશ્ચત્વારઃ । ચતુષ્પાદમેતદક્ષરં દ્વિવર્ણ
ચતુર્માત્રં સર્વવ્યાપિ સર્વવિભવયાતયામં બ્રહ્મ બ્રાહ્મી બ્રહ્મ દૈવતમ્ ॥ ૬॥

તસ્ય પૂર્વા માત્રા પૃથિવ્યકારઃ સ ઋગ્ભિરૃગ્વેદો બ્રહ્મા વસવો ગાયત્રી ગાર્હપત્યઃ । દ્વિતીયાન્તરિક્ષમુકારઃ સ
યજુર્ભિર્યજુર્વેદો રુદ્રો રુદ્રા ત્રિષ્ટુબ્દક્ષિણાગ્નિઃ ।
તૃતીયા દ્યૌર્મકારઃ સ સામભિઃ સામવેદો વિષ્ણુરાદિત્યા જગત્યાહવનીયઃ ।
યાવસાનેઽસ્ય ચતુર્થ્યર્ધમાત્રા સાલુપ્તમકારઃ સોઽથર્વણૈરથર્વવેદઃ સંવર્તકો
ઽગ્નિર્મરુતો વિરાડેકઋષિરઙ્ગિરા ભાસ્વતી સ્વભા ॥ ૭॥

પ્રથમા રક્તા બ્રાહ્મી બ્રહ્મદૈવત્યા । દ્વિતીયા શુભશુક્લા રૌદ્રી રુદ્રદૈવત્યા । તૃતીયા
કૃષ્ણા વિષ્ણુમતી વિષ્ણુદૈવત્યા । ચતુર્થી વિદ્યુન્મતી સર્વવર્ણા પુરુષદૈવત્યા । સ
એષ ઓઙ્કારો ભવતિ ॥ ૮॥

ૐ ઇત્યેકાક્ષરં બ્રહ્મ યદુક્તં બ્રહ્મવાદિભિઃ ।
શરીરં તસ્ય વક્ષ્યામિ સ્થાનં કાલં લયં તથા ॥ ૯॥

તત્ર દેવાસ્ત્રયઃ પ્રોક્તા લોકા વેદાસ્ત્રયોઽગ્નયઃ ।
તિસ્રો માત્રાર્ધમાત્રા ચ ત્ર્યક્ષરસ્ય શિવસ્ય ચ ॥ ૧૦॥

ઋગ્વેદો ગાર્હપત્યશ્ચ પૃથિવી બ્રહ્મ એવ ચ ।
અકારસ્ય શરીરં તુ વ્યાખ્યાતં બ્રહ્મવાદિભિઃ ॥ ૧૧॥

યજુર્વેદોઽન્તરિક્ષં ચ દક્ષિણાગ્નિસ્તથૈવ ચ ।
વિષ્ણુશ્ચ ભગવાન્દેવ ઉકારઃ પરિકીર્તિતઃ ॥ ૧૨॥

સામવેદસ્તથા દ્યૌશ્ચાહવનીયસ્તથૈવ ચ ।
ઈશ્વરઃ પરમો દેવો મકારઃ પરિકીર્તિતઃ ॥ ૧૩॥

સૂર્યમણ્ડલમાભાત્ય અકારઃ શઙ્ખમધ્યગઃ ।
ઉકારશ્ચન્દ્રસઙ્કાશસ્તસ્ય મધ્યે વ્યવસ્થિતઃ ઃ ॥ ૧૪॥

મકારસ્ત્વગ્નિસઙ્કાશો વિધૂમો વિદ્યુતોપમઃ ।
તિસ્રો માત્રાસ્તથા જ્ઞેયાઃ સોમસૂર્યાગ્નિતેજસા ॥ ૧૫॥

શિખા ચ દીપસઙ્કાશા યસ્મિંસ્તુ પરિવર્તતે ।
અર્ધમાત્રા તુ સા જ્ઞેયા પ્રણવસ્યોપરિ સ્થિતા ।
બ્રહ્મસૂત્રનિભા સૂક્ષ્મા શિખાભા દૃશ્યતે પરા ॥ ૧૬॥

યા સા પ્રથમા માત્રા બ્રહ્મદેવત્યા રક્તા, વર્ણેન યસ્તાં ધ્યાયતે નિત્યં સ ગચ્છેદ્બ્રાહ્મં પદમ્ । યા સા દ્વિતીયા માત્રા વિષ્ણુદેવત્યા કૃષ્ણા વર્ણેન યસ્તાં ધ્યાયતે
નિત્યં સ ગચ્છેદ્વૈષ્ણવં પદમ્ । યા સા તૃતીયા માત્રા ઈશાનદેવત્યા કપિલા વર્ણેન
યસ્તાં ધ્યાયતે નિત્યં સ ગચ્છેદૈશાનં પદમ્ । યા સાર્ધચતુર્થી માત્રા સર્વદેવત્યા
। વ્યક્તીભૂતા ખં વિચરતિ શુદ્ધસ્ફટિકસન્નિભા વર્ણેન યસ્તાં ધ્યાયતે નિત્યં સ
કુબ્જેશ્વરત્વં પ્રાપ્નોત્યેવં વેદ મહાકુબ્જિકોપનિષત્ ॥ ૧૭॥

## ॥ ૯॥

મહાભૂતદિનાર્ધરાત્રે શ્મશાને ગત્વાસનં સંશોધ્ય મહાપાત્રં સંસ્થાપ્ય મહાયન્ત્રં
પ્રપૂજ્ય મહાશઙ્ખમાલયા દિક્સહસ્રં સમ્જપ્ય સન્તર્પ્ય સમર્પ્ય પિષ્ટમયપ્રતિમાં કૃત્વા
હૃદયે સ્વશત્રોઃ સાધ્યં સંલિખ્ય પૃથ્વીબીજ વિસર્ગબિન્દુયુતં સર્વાઙ્ગે સંલિખ્ય
દક્ષિણાભિમુખં સંસ્થાપ્ય જીવન્યાસં કુર્યાત્ ॥ ૧॥

જીવલા નઘારિષાં જીવન્તીમોષધીમહમ્ ।
ત્રાયમાણાં સહમાનાં સહસ્વતીમિહ હુવેऽસ્મા અરિષ્ટતાતયે ॥ ૨॥

ઇહાયન્તુ પ્રચેતસો મેદિનીર્વચસો મમ ।
યથેમં પારયામસિ પુરુષં દુરિતાદધિ ॥ ૩॥

પ્રાણમાહુર્માતરિશ્વાનં વાતો હ પ્રાણમુચ્યતે ।
પ્રાણે હ ભૂતં ભવ્યં ચ પ્રાણે સર્વં પ્રતિષ્ઠિતમ્ ॥ ૪॥

પ્રાણાય નમો યસ્ય સર્વમિદં વશે ।
યો ભૂતઃ સર્વસ્યેશ્વરો યસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૫॥

આથર્વણીરાઙ્ગિરસીર્દૈવીર્મનુષ્યજા ઉત ।
ઓષધયઃ પ્રજાયન્તે યદા ત્વં પ્રાણ જિન્વસિ ॥ ૬॥

યો અસ્ય વિશ્વજન્મન ઈશે વિશ્વસ્ય ચેષ્ટતઃ ।
અન્યેષુ ક્ષિપ્રધન્વને તસ્મૈ પ્રાણ નમોऽસ્તુ તે ॥

ઇત્યનેન પ્રાણપ્રતિષ્ઠાં કૃત્વા ધ્યાત્વા પૂજયેત્ ॥ ૭॥

ગૃધ્રકર્ણિ વિરૂપાક્ષિ લમ્બસ્તનિ મહોદરિ ।
જહિ શત્રૂન્ત્રિશૂલેન કુદ્ધાસ્ય પિબ શોણિતમ્ ॥ ૮॥

કૃષ્ણવર્ણિ બૃહદ્રૂપિ બૃહત્સ્કન્ધિ મહયિ ।

દેવિ દેવિ મહાદેવિ મમ શત્રૂન્વિનાશયોં નમઃ ॥ ૯॥

યદા કેશાનસ્થિ સ્નાવ માંસં મજ્જાનમાભરત્ ।
શરીરં કૃત્વા પાદવત્કં લોકમનુ પ્રાવિશત્ ॥ ૧૦॥

કુતઃ કેશાન્કુતઃ સ્નાવ કુતો અસ્થીન્યાભરત્ ।
અઙ્ગા પર્વાણિ મજ્જાનં કો માંસં કુત આભરત્ ॥ ૧૧॥

સંસિચો નામ તે દેવા યે સમ્ભારાં સમભરન્ ।
સર્વં સંસિચ્ય મર્ત્યં દેવાઃ પુરુષમાવિશન્ ॥ ૧૨॥

ઊરૂ પાદાવષ્ઠીવન્તૌ શિરો હસ્તાવથો મુખમ્ ।
પૃષ્ટીર્બર્જહ્યે પાર્શ્વે કસ્તત્સમદધાદૃષિઃ ॥ ૧૩॥

શિરો હસ્તાવથો મુખ જિહાં ગ્રીવાશ્ચ કીકસાઃ ।
ત્વચા પ્રાવૃત્ય સર્વં તત્સન્ધા સમદધાન્મહી ॥ ૧૪॥

યત્તચ્છરીરમશયત્સન્ધયા સહિતં મહત્ ।
યેનેદમદા રોચતે કો અસ્મિન્વર્ણમાભરત ॥ ૧૫॥

સર્વે દેવા ઉપાશિક્ષન્તદજાનાદ્વધૂઃ સતી ।
ઈશા વશસ્ય યા જાયા સાસ્મિન્વર્ણમાભરત ॥ ૧૬॥

યદા ત્વષ્ટા વ્યતૃણત્પિતા ત્વષ્ટ્ય ઉત્તરઃ ।
ગૃહં કૃત્વા મર્ચં દેવાઃ પુરુષમાવિશન્ ॥ ૧૭॥

કુત ઇન્દ્રઃ કુતઃ સોમઃ કુતો અગ્નિરજાયત ।
કુતસ્ત્વષ્ટા સમભવત્કુતો ધાતાજાયત ॥ ૧૮॥

ઇન્દ્રાદિન્દ્રઃ સોમાત્સોમો અગ્નેરગ્નિરજાયત ।
ત્વષ્ટા હ જજ્ઞે ત્વષ્ટુર્ધાતુર્ધાતાજાયત ॥ ૧૯॥

સ્વપ્નો વૈ તન્દ્રી નિરૃતિઃ કુબ્જિકા નામ દેવતાઃ ।
જરા ખારત્યં પાલિત્યં શરીરમનુ પ્રાવિશન્ ॥ ૨૦॥

સ્તેયં દુષ્કૃતં વૃજિનં સત્યં યજ્ઞં યશો બૃહત્ ।
બલં ચ ક્ષત્રમોજશ્ચ શરીરમનુ પ્રાવિશન્ ॥ ૨૧॥

ભૂતિશ્ચ વા અભૂતિશ્ચ રાતયોઽરાતયશ્ચ યાઃ ।
ક્ષુધશ્ચ સર્વાસ્તૃષ્ણાશ્ચ શરીરમનુ પ્રાવિશન્ ॥ ૨૨॥

નિન્દાશ્ચ વા અનિન્દાશ્ચ યચ્ચ હન્તેતિ નેતિ ચ ।
શરીરં શ્રદ્ધા દક્ષિણાશ્રદ્ધા ચાનુ પ્રાવિશન્ ॥ ૨૩॥

વિદ્યાપ વા અવિદ્યાશ્ચ યચ્ચાન્યદુપદેશ્યમ્ ।
શરીરં બ્રહ્મ પ્રાવિશદૃચઃ સામાથો યજુઃ ॥ ૨૪॥

આનન્દા મોદાઃ પ્રમુદોઽભીમોદમુદશ્ચ યે ।
હસો નરિષ્ટા નૃત્તાનિ શરીરમનુ પ્રાવિશન્ ॥ ૨૫॥

આલાપાશ્ચ પ્રલાપાશ્ચાભીલાપલપાશ્ચ યે ।
શરીરં સર્વે પ્રાવિશન્નાયુજઃ પ્રયુજો યજુઃ ॥ ૨૬॥

પ્રાણાપાનૌ ચક્ષુઃ શ્રોત્રમક્ષિતિશ્ચ ક્ષિતિશ્ચ યા ।
વ્યાનોદાનૌ વાઙ્મનઃ શરીરેણ ત ઈયન્તે ॥ ૨૭॥

આશિષશ્ચ પ્રશિષશ્ચ સંશિષો વિશિષશ્ચ યાઃ ।
ચિત્તાનિ સર્વે સઙ્કલ્પાઃ શરીરમનુ પ્રાવિશન્ ॥ ૨૮॥

આસ્તેયીશ્ચ વાસ્તેયીશ્ચ ત્વરણાઃ કૃપણાશ્ચ યાઃ ।
ગુહ્યાઃ શુક્રાઃ સ્થૂલા આપસ્તા બીભત્સાવસાદયન ॥ ૨૯॥

અસ્થિ કૃત્વા સમિધં તદષ્ટાપો અસાદયન્ ।
રેતઃ કૃત્વાજ્યં દેવાઃ પુરુષમાવિશન્ ॥ ૩૦॥

ઇત્યનેન જીવન્યાસં કૃત્વા અનેન મન્ત્રેણ પ્રતિમાં પૂજયેત્ । સ્વાત્માનં બ્રહ્મસ્વરૂપં
ધ્યાત્વા પ્રજ્વલચ્ચિતાગ્નૌ પુત્તલિકાં લોમેનેતિ મન્ત્રેણ જુહુયાત્ ॥ ૩૧॥

યા આપો યાશ્ચ દેવતા યા વિરાડ્બ્રહ્મણા સહ ।
શરીરં બ્રહ્મ પ્રાવિશચ્છરીરેઽધિ પ્રજાપતિઃ ॥ ૩૨॥

સૂર્યશ્ચક્ષુર્વાતઃ પ્રાણં પુરુષસ્ય વિભેજિરે ।
અથાસ્યેતમાત્માનં દેવાઃ પ્રાયચ્છન્નગ્નયે ॥

ઇત્યનેન બ્રહ્મસ્વરૂપોઽયમાત્મા બ્રહ્મેતિ ॥ ૩૩॥

તસ્માદ્વૈ વિદ્વાન્પુરુષમિદં બ્રહ્મેતિ મન્યતે ।
બ્રહ્માપરં યુજ્યતાં બ્રહ્મ પૂર્વં બ્રહ્માન્તતો મધ્યતો બ્રહ્મ સર્વતઃ ॥

એવં બ્રહ્માત્માનં જ્ઞાનં જ્ઞાત્વા લોમ લોમ્નેતિ મન્ત્રેણ હોમયેત્ ॥ ૩૪॥

લોમ લોમ્ના સઙ્કલ્પયા ત્વચા સઙ્કલ્પયા ત્વચમ્ ।

અસૃક્તે અસ્થિ રોહતુ માંસં માંસેન રોહતુ ॥ ૩૫॥

અમુકસ્ય દહ ગાત્રાણિ દહ માંસં દહ ત્વચમ ।
દહ ત્વગસ્થ્યસૃગ્લોમાનિ અસ્થિભ્યો મજ્જિકાં દહ ॥

ઇતિ મન્ત્રેણ હોમયેત્ ॥ ૩૬॥

અર્ચિત્વા કૃષ્ણપુષ્પૈસ્તાં દગ્ધ્વા ધૂપં બલિં હરેત્ ।
બલિમાલોમિકા ધાનાં શકુલ્યઃ પલલં સુરામ્ ॥ ૩૭॥

પિષ્ટકુલ્માષમાંસાનિ મધુલોડાફલાનિ ચ ।
પુષ્પાનિ કૃશરં મત્સ્યાનપૂપાનુપહારયેત્ ॥ ૩૮॥

યત્તે દેવી નિરૃતિરાબબન્ધ દામ ગ્રીવાસ્વવિમોક્યં યત્ ।
તત્તે વિ ષ્યામ્યાયુષે વર્ચસે બલાયાદોમદમન્નવૃદ્ધિઃ પ્રસૂતઃ ॥ ૩૯॥

નમોઽસ્તુ તે નિરૃતે તિગ્મતેજોઽયસ્મયાન્વિન્તા બન્ધપાશાન્ ।
યમો મહ્યં પુનરિત્ત્વાં દદાતિ તસ્મૈ યમાય નમો અસ્તુ મૃત્યવે ॥ ૪૦॥

ૐ નમો યમાય પઞ્ચમહાપ્રેતાધિપતયે હ્રીં મમ શત્રૂન્મારય ૨ શોષય ૨
તાડય ૨ ભેદય ૨ છેદય ૨ દહ ૨ પચ ૨ મથ ૨ વિધ્વંસય ૨
મમામુકશત્રોઃ
સપરિવારં નાશય ૨ કહ્ક્ષ્રેં ફટ્ સ્વાહા ॥ ઇત્યનેન યમરાજં પૂજયેત્ । સ સર્વાન્
શત્રૂન્મારયતિ સ સર્વશત્રુચ્ચાટનં કરોતિ સ સર્વલોક જયતીતિ ॥ ૪૧॥

## ॥ ૧૦॥

યદિ કશ્ચિદનર્થવિદો જ્ઞાત્વા પ્રમાદાદ્વા લોભાદ્વા યઃ પ્રયોગં કુરુતે વિપરીતફલભાગ્ભવતિ પઞ્ચત્વમાપ્નોતિ સ વાતુલો ભવતિ ॥ ૧॥

અથર્વવેદોક્તઃ પિપ્પલાદશૌનકીશાખાધ્યાપકો પારાશરગોત્રોત્પન્નબ્રાહ્મણો વા
કુબ્જિકોપાસકસ્વિરાત્ર્યુપોષિતઃ પ્રાઙ્મુખો વાગ્યતો બર્હિષ્યુપવિશ્ય સહસ્રં કૃત્વાવર્તયેત્સિધ્યન્ત્યસ્યાર્થા સર્વકર્માણિ સર્વપ્રયોગાદીનિ ।
વશ્યં વિદ્વેષણં ચૈવ મારણં મોહનં તથા ॥ ૨॥

ય એવં વેદ મહાકુબ્જિકારહસ્યોપનિષત્સર્વોપનિષત્સારતત્ત્વાર્થં વેદ । સ સર્વકાણિ કરોતિ પરસેનાસ્તમ્ભનં કરોતિ પરસેનાન્વિદ્રાવયતિ શોષયતિ મારયતિ
મોહયતિ સ્તમ્ભયતિ ય એવં વેદ ॥ ૩॥

મ્સ્સ્

કૃતે પૂર્વામ્નાયોર્ધ્વામ્નાયોપાસનં કુર્યાત્ । ત્રેતાયાં દક્ષિણોત્તરામ્નાયોપાસનં કુર્યાત્ । દ્વાપરેઽધામ્નાયોપાસનં કલૌ પશ્ચિમામ્નાયોપાસનં કુર્યાત્ ॥ ૪॥

મહાકુબ્જિકે પશ્ચિમામ્નાયેશ્વરિ સર્વભૂતેશ્વરિ મહાવિદ્યેશ્વરિ દેવિ શરણં ત્વાહમાગતો દૌર્ભાગ્ય મે જહિ સૌભાગ્યવતિ સર્વસૌભાગ્યં મે દેહિ ધનવતિ ધનં મે દેહિ
યશસ્વતિ યશો મે દેહિ પુત્રવતિ પુત્રપૌત્રાન્મે દેહિ સર્વવતિ સર્વાન્મે કામાન્મે
દેહિ ॥ ૫॥

ઇતિ મન્ત્રેણ કુબ્જિકાં પ્રણમ્ય ભૌમાષ્ટમ્યાં મહાનિશાર્ધે શ્મશાને ગત્વા પ્રેતાસનોપવિશ્ય કપાલપાત્રં ઘૃતપૂરિતં ષટ્કોણાષ્ટકોણં ચતુરસ્રં કૃત્વા પૂર્ણપાત્રં સંસ્થાપ્ય
વીરનાઝ્યેન ષોડશતન્તુભિર્વર્તિકાં કૃત્વા પશ્ચિમાભિમુખં દીપ પ્રજ્વાલ્યાહોરાત્રપર્યન્તં “અમુકં મે વશમાનય ૐ હસ્ક્ષૈં આં હ્રીં ક્રોં શક્ષૈં ઓં” ઇતિ
શતમષ્ટોત્તરસહસ્રં સનપાત્પ્રત્યક્ષં કુબ્જિકાદર્શનં કરોતિ ત્રૈલોક્યં વશમાનયતિ
ય એવં વેદેતિ મહાકુબ્જિકાપૂજનોપનિષત્ ॥ ૬॥

## ॥ ૧૧॥

કાલિકા ચ મહાકુબ્જા તારાપિ કુબ્જિકા સ્મૃતા ।
ષોડશી સિદ્ધિકુબ્જા ચ કુબ્જિકા ભુવનેશ્વરી ॥ ૧॥

કુબ્જા ભૈરવી વિખ્યાતા કુબ્જિકા છિન્નમસ્તકા ।
ધૂમાવતી સ્મૃતા કુબ્જા કુબ્જિકા બગલામુખી ।
માતઙ્ગી વીરકુબ્જા ચ કુબ્જિકા કમલાપરા ॥ ૨॥

પૂર્વામ્નાયેશ્વરી કુબ્જા પશ્ચિમામ્નાયસ્વરૂપિણી ।
ઉત્તરામ્નાયેશ્વરી કુબ્જા દક્ષિણામ્નાયસ્વરૂપિણી ॥ ૩॥

અધામ્નાયેશ્વરી કુબ્જા મહોમ્નિઆયસ્વરૂપિણી ।
ષસિંહાસનગા કુબ્જા રત્નસિંહાસનસ્થિતા ॥ ૪॥

બ્રહ્માણીસહિતો બ્રહ્મા માહેશીસહિતઃ શિવઃ ।
વૈષ્ણવીસહિતો વિષ્ણુઃ કુબ્જિકાં સમુપાસતે ॥ ૫॥

કાલિકાદ્યા મહાદશવિદ્યાઃ કુબ્જિકાપૂજાયન્ત્રરાજોપરિ બાહ્યાદિક્રમેણ ષટ્કોણે
બિન્દુચક્રે ગુરૂપદિષ્ટમાર્ગેણ યજેત્ । દ્વારદેવતા હ્યાદૌ સમ્પૂજ્ય તતોઽષ્ટકોણદેવતાં
યજેદિતિ ॥ ૬॥

કાલિકા મહોગ્રતારાં ષોડશી ભુવનેશ્વરી ભૈરવી પ્રચણ્ડોગ્રચણ્ડિકા ધૂમાવતી માતઙ્ગીં બગલામુખીં શ્રીસિદ્ધિલક્ષ્મી યથાક્રમેણોક્તમન્ત્રેણ યજેત્ । શ્રીસિદ્ધિલક્ષ્મ્યા
મહાનવાર્ણામૂલેન શ્રીસિદ્ધિલક્ષ્મી યજેત્ । બિન્દુચક્રરાજોપરિ શ્રીસિદ્ધિલક્ષ્મી
મહાષોડશોપચારૈઃ પ્રપૂજયેત્ । કાલિકોગ્રતારાઃ પ્રચણ્ડચણ્ડિકા ત્રિકોણે સ । મ્પૂજયેત્ । દ્વાવિંશત્યક્ષરેણ મહાકાલિકાં યજેત્ । પશ્ચિમાદિક્રમેણ ષટ્કોણચક્રે
ષોડશીભુવનેશ્વરીભૈરવીધૂમાવતીમાતઙ્ગીબગલામુખીર્યજેત્ । તારાં ત્ર્યક્ષરેણ ભુવનેશ્વરીં હ્યેકાક્ષરેણ ચૈતન્યભૈરવ્યા મહાષટ્કટમહામન્ત્રરાજેન ધૂમાવતી સપ્તાક્ષરેણ
માતઙ્ગી મહાષ્ટાક્ષરેણ ષટ્ત્રિંશતિરક્ષરીમહાબ્રહ્માસ્ત્રમન્ત્રરાજેન બગલામુખીં યજેત્ । પશ્ચિમાદિવામાવર્તેન તદ્યન્ત્રં તચ્ચક્રમણ્ડલે યથોક્તક્રમેણ કુબ્જિકા યજેત્ ।
મહાનિશાર્ધે મહાપઞ્ચમકારેણ સર્વદા પ્રપૂજયેદિતિ ॥ ૭॥

શાક્તેષુ દિવ્યબ્રહ્મચારી રાત્રૌ નગ્નઃ સદા મૈથુનાસક્તો મધુનાસક્તો મનસા
જપપૂજાદિનિયમો યોષિતાં પ્રિયકરો ભગોદકેન તર્પણં યોનિક્ષતેન તોયેન તર્પણ
તેનૈવ પૂજનં સર્વદા કુબ્જિકારૂપમાત્માનં વિભાવ્ય મહાર્ઘપાત્રં સંસ્થાપ્ય મહાયન્ત્ર
પ્રપૂજ્ય મહાશઙ્ખમાલયા શતમષ્ટોત્તરં સાપ્ય તર્પ્ય સમર્પ્ય લેહ્યચોષ્યપેયાત્મક
ભક્ષ્યભોજ્યમાચરેદિતિ ॥ ૮॥

એવં યઃ ક્રિયતે કુબ્જિકારાધનં સ
નક્ષત્રાણાં યથા સોમો જ્યોતિષામિવ ભાસ્કરઃ ।
ભાતિ સર્વેષુ લોકેષ્વિતિ ॥ ૯॥

ચક્ષુષો હેતે મનસો હેતે બ્રહ્મણો હેતે તપસશ્ચ હેતે ॥ ૧૦॥

તં ત્વા પ્રપદ્યે તં ત્વા પ્રવિશામિ
સર્વગુઃ સર્વપુરુષઃ સર્વાત્મા સર્વતનૂઃ સહ યન્મેઽસ્તિ તેન ॥ ૧૧॥

સ સર્વાત્મા સ સર્વભૂતાત્મા સ જ્ઞાનાત્મા સ વિશ્વાત્મા સ પરમાત્મા સ અન્તરાત્મા સ અન્તરાન્તરાત્મા સ જીવાત્મા સ દેવાત્મા સ વેદાત્મા સ લોકાત્મા
સ પરબ્રહ્માત્મા સ જ્યોતિરૂપાત્મા સ સર્વવ્યાપિપુરુષો ભવતિ । સ સાક્ષિમાત્રોઽવતિષ્ઠતિ સ પુણ્યપાપૈર્ન લિપ્યતે । યન્ત્ર નાદુઃખં સુખં શાન્તં નિત્યાનન્દ
બ્રહ્માદિવન્દિતં નિર્વાણં લબ્ધ્વા પુનરાવર્તતિ ॥ ૧૨॥

મહાપૂર્ણાભિષેકં કૃત્વા કુબ્જિકોપાસનં કુર્યાન્નો ચેદ્વાતુલો ભવતિ પઞ્ચત્વં પ્રા
પોત્યેવં વેદ ।
પૂર્ણાત્પૂર્ણમુદજતિ પૂર્ણં પૂર્ણેન સિચ્યતે ।

સ સર્વમન્ત્રોપદેશં ગૃહ્ણીયાત્ । કેચિચ્ચિદાચાર્યમુખેન સૌર્યં ગાણપત્યં શૈવં વૈષ્ણવં શક્તિમન્ત્રં વેદોક્તમન્ત્રં નવગ્રહમન્ત્રમષ્ટાવિંશતિનક્ષત્રમન્ત્રં સર્વમન્ત્રં ગૃહ્ણીયાત્તસ્ય સર્વયન્ત્રપૂજનેઽપ્યધિકારઃ સ સર્વતન્ત્રાધ્યાપકો ભવતિ ॥ ૧૩॥

સત્યં બૃહદૃતમુગ્રં દીક્ષા તપો બ્રહ્મ યજ્ઞઃ પૃથિવીં ધારયન્તિ ॥ ૧૪॥

યદભિવદતિ દીક્ષામુપૈતિ યદુદકં યાચત્યપઃ પ્રણયતિ ॥ ૧૫॥

યા એવ યજ્ઞ આપઃ પ્રણીયન્તે તા એવ તાઃ ॥ ૧૬॥

યત્તર્પણમાહરન્તિ ય એવાગ્નિષોમીયઃ પશુર્બધ્યતે સ એવ સઃ ॥ ૧૭॥

એતદ્વા ઉ સ્વાદીયો યદધિગવં ક્ષીરં વા માંસ વા તદેવ નાશ્નીયાત્ ॥ ૧૮॥

શ્રિયં ચ વા એષ સંવિદં ચ ગૃહાણામશ્નાતિ યઃ પૂર્વોઽતિથેરનાતિ ॥ ૧૯॥

અશિતાવત્યતિથાવશ્નીયાદ્યજ્ઞસ્ય સાત્મત્વાય યજ્ઞસ્યાવિચ્છેદાય તદ્વ્રતમ્ ॥ ૨૦॥

બ્રાહ્મણો જજ્ઞે પ્રથમો દશશીર્ષો દશાસ્યઃ ।
સ સોમં પ્રથમઃ પપૌ સ ચકારારસં વિષમ ॥ ૨૧॥

અભિ પ્રેહિ દક્ષિણતો ભવા નોઽધા વૃત્રાણિ જઙ્ઘનાવ ભૂરિ ।
જુહોમિ તે ધરુણં મધ્વો અગ્રમુભાવપાંશુ પ્રથમા પિબાવ ॥ ૨૨॥

યસ્ય પિતા પિતામહઃ સોમં ન પિબતિ સ પશુત્વં પ્રાપ્નોતિ ય એવં વેદ
મહાકુબ્જિકાપૂજનતત્ત્વોપનિષત્ ॥ ૨૩॥

## ॥ ૧૨॥

અથ મહાકાલિકાં વ્યાખ્યાસ્યામઃ ॥ કામરેફેન્દિરાસમષ્ટિરૂપિણીમેતત્તિગુણિતામાદૌ । તદનુ કૂર્ચદ્વયમ્ । કૂર્ચબીજં તુ વ્યોમષષ્ઠસ્વરબિન્દુમેલનરૂપમ્ । તદેવ
દ્વિરુચ્ચાર્ય । ભુવનાદ્વયમ્ । ભુવના તુ વ્યોમજ્વલનેન્દિરાકલાબિન્દુમેલનરૂપા ।
તદ્દ્યમ્ । દક્ષિણા કાલિકા ચેત્યભિમુખગતા । તદનુ બીજસપ્તકમુચ્ચાર્ય બૃહદ્ભાનુજાયામુદ્ધરેત્ । સ તુ શિવમયો ભવેત્ । સ તુ સર્વસિદ્ધીશ્વરો ભવેત્ ।
ગતિસ્તસ્યાસ્તીતિ । નાન્યસ્ય ગતિરસ્તીતિ । સ તુ વાગીશ્વરઃ સ તુ નારીશ્વરઃ
સ તુ દેવેશ્વરઃ સ તુ લોકેશ્વરઃ સ તુ સર્વેશ્વર ઇતિ ॥ ૧॥

ભૈરવોઽસ્ય ઋષિઃ પ્રોક્ત ઉષ્ણિક્છન્દ ઉદાહૃતઃ ।
હૃદિસ્થા ચ મહાવિદ્યા કાલિકા ગુહ્યકાલિકા ॥ ૨॥

કાલી કરાલી ચ મનોજવા ચ સુલોહિતા યા ચ સુધૂમ્રવર્ણા ।
સ્ફુલિઙ્ગિની વિશ્વરુચી ચ દેવી લેલાયમાના ઇતિ સપ્ત જિહ્વાઃ ॥ ૩॥

અભિનવજલદસઙ્કાશામુન્નતસ્તની કુટિલદંષ્ટ્રા શવાસના કાલિકા ધ્યેયા । ત્રિ
કોણં ત્રિકોણં નવકોણં પદ્મમ્ । તસ્મિન્દેવીં સર્વાઙ્ગેનાભ્યર્ચ્ય પઞ્ચમહામકારેણ
રાત્રૌ સર્વદા યજેદિતિ ॥ ૪॥

જીવન્મુક્તઃ સ વિજ્ઞેયો યઃ સ્મરેત્કાલિકાં પરામ્ ॥ ૫॥

પઞ્ચમકારેણ ભુક્તિમુક્તિકવિત્વપુત્રપશુકીર્તિજ્ઞાનૈશ્વર્યવાન્ભવતિ ય એવં વેદેતિ મહાકુબ્જિકોપનિષત્ ॥ ૬॥

## ॥ ૧૩॥

અથ મહોગ્રતારાં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં વેદાદિબીજમ । દ્વિતીયં ત્રપાબીજમ ।
તૃતીયં ક્રોધબીજમિતિ ॥ ૧॥

વાગાદ્યાં કમલાદ્યા કામાદ્યાં વા જગત્તારિણીમેતાં યો વિન્દ્યાત્સ વાગીશો
ભવતિ સર્વશ્રવણો ભવતિ સર્વાં સમ્પદમીષ્ટે ॥ ૨॥

શુદ્ધા નિષ્કલાં ત્રિવર્ણપૂતાં યો જાનાતિ સ પાપ્માનં તરતિ સ બ્રહ્મહત્યાં
તરતિ સ વીરહત્યાં તરતિ સ ભ્રૂણહત્યાં તરતિ સ મૃત્યુ તરતિ । મુક્તિં લભતે
ગર્ભજન્મજરામરણતાપત્રયાત્મકં દુઃખં તરતિ ॥ ૩॥

ય એતાં ભુવનાદ્યાં સ્મરતિ ચિન્તયતિ ધારયતિ ગુરુમુપાસ્તે સ ચતુર્વર્ગફલભાગ્ભવતિ ॥ ૪॥

યો મહાચીનક્રમેણ લતાગાદે મહાશઙ્ખમાલયા લક્ષમાવર્તયતિ સ વિશ્વાધીશો
ભવતિ સ સર્વવિદ્યાવાન્ભવતિ સ બ્રહ્મધામવાન્ભવતિ સ નિર્લેપો નિષ્કલો દ્વન્દ્વવર્જિતો વિગતજ્વર
આસન્તત્ત્વવિષયો અમૃતત્વપદમશ્નુતે સ નિર્વાણપદમાપ્નોતિ ॥ ૫॥

પૂજાસ્થાનમસ્યા અન્તઃ ષટ્કોણમષ્ટદલં ભૂપુરમિતિ । ષટ્કોણેષુ ષડઙ્ગ મધ્યે તારામષ્ટપત્તે યોગિન્યઃ ॥ ૬॥

યોગિન્યો યથા ।
મહાકાલ્યથ રુદ્રાણી ઉગ્રા ભીમા તથૈવ ચ ।
ઘોરા ચ ભ્રામરી ચૈવ મહારાત્રિશ્ચ સપ્તમી ।
ભૈરવી ચાષ્ટમી પ્રોક્તા યોગિનીસ્તાશ્ચ પૂજયેત્ ॥ ૭॥

ઇત્થં યો ભજતે દેવીં સ ભવેત્કલ્પપાદપઃ ।
સર્વકામમવાપ્નોતિ પ્રાપ્નોતિ પરમં પદમ્ । ૐ તત્સત્ ॥ ૮॥

ઇમામધીયાનસ્તર્ક આગમપુરાણકાવ્યદિવ્યૌષધીશો ભવતિ સ સર્વમન્ત્રજાપકો ભવતિ સ સર્વયન્ત્રપૂજકો ભવતિ સ સર્વદેવસમો ભવતિ સ સર્વદેવસમો ભવતિ
ય એવં વેદ કબ્જિકારાધનક્રમતત્ત્વોપનિષત ॥ ૯॥

## ॥ ૧૪॥

અથ રાજરાજેશ્વર્યા મહાષોડશાર્ણમન્ત્રોદ્ધારં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં મહાલક્ષ્મીબીજમ્ । મહાલક્ષ્મીબીજં તુ કુલકૌલિની વિશ્વતોમુખ્યારૂઢં માયાસ્વરભૂષિતં
કલાકુબ્જિકાભૂષિતમ્ । શ્રીબીજમ્ । દ્વિતીયં ભુવનેશ્વરીબીજમ્ । ભુવનેશ્વરીબીજ
તુ પરાત્મા વ્યાપકારૂઢં બિન્દુમાલિનીભૂષિતં કલાકુબ્જિકાયુતમ્ । ભુવનેશ્વરીબીજમ્ । તૃતીયં કામરાજમ્ । કામરાજં તુ મહાકાલી માંસારૂઢં મોહિનીભૂષિતં
કલાકુબ્જિકાયુતમ્ । કામરાજમ્ । ચતુર્થં વાગ્ભવમ્ । વાગ્ભવં તુ જ્ઞાનામૃતા વ્યોમરૂપીભૂષિતં કલાકુબ્જિકાયુતમ્ । વાગ્ભવમ્ । પઞ્ચમં શક્તિબીજમ્ । શક્તિબીજ
તુ જગબીજં જ્વાલામાલિનીભૂષિતં કલામૃતાવર્ષણીયુતમ્ । શક્તિબીજમ્ । ષષ્ઠમં
વેદાદિબીજમ્ । વેદાદિબીજં તુ પશ્ચિમાસ્યઃ પૂર્ણિમાભૂષિતં કલાકુબ્જિકાયુતમ્ ।
વેદાદિબીજમ્ । સપ્તમં હ્યષ્ટમં લજ્જાબીજં શ્રીબીજં સમુચ્ચાર્ય । ત્રિકૂટાત્મા મહાપઞ્ચદશાક્ષરી નવમં દશમૈકાદશમં બીજં ભવતિ । પઞ્ચદશાક્ષરી તુ મહાકાલઃ
કુણ્ડલી પાવકઃ પિનાકીશઃ । સમુચ્ચાર્ય ભુવનાબીજં પઠેત્ । પરાત્માપરમાત્મામહાકાલીચૈતન્યવેદાસ્ત્રકૂટં પઠિત્વા માયાબીજં પઠેત્ । નીલકણ્ઠઃ સ્થાણુઃ
ક્રોધીશો બીજાત્મા લજ્જાબીજમ્ । દ્વાદશમં શક્તિબીજમ્ । ત્રયોદશમં ચતુર્દશમં
વાગ્ભવં મન્મથાખ્યમ્ । પઞ્ચદશમં ભુવનેશ્વરીબીજમ્ । લક્ષ્મીબીજં ષોડશમમ્ ॥ ૧॥

એષા મહાત્રિપુરેશ્વર્યા મહાષોડશાર્ણમન્ત્રરાજ યો જાનાતિ સ સાદેહસારૌપ્યસાયુજ્યસાલીનત્વં પ્રાપ્નોતિ સ નિર્વાણેશો ભવતિ સ સર્વસામ્રાજ્યવાન્ભવતિ સ
ચિત્તાનાકર્ષયતિ સ જીવાનાકર્ષયતિ સ નામાકર્ષયતિ સ બુધ્યાનાકર્ષયતિ સ
ધૈર્યાનાકર્ષયતિ સ રૂપાનાકર્ષયતિ સ પ્રાણાનાકર્ષયતિ સ દેવાનાકર્ષયતિ સ ।
લોકાનાકર્ષયતિ સ સર્વાનાકર્ષયતિ ॥ ૨॥

ઋષિશ્ચ દક્ષિણામૂર્તિઃ પશ્છિન્દસ્તુ સમ્મુખે ।
દેવતા ચ મહાવિદ્યા ષોડશી ત્રિપુરેશ્વરી ॥ ૩॥

બીજં ચ વાગ્ભવં પ્રોક્ત શક્તિશ્ચ શક્તિબીજકમ ।
કામરાજ મહાબીજ કીલકે વિનિયોજયેત્ ॥ ૪॥

પૂજાસ્થાનમસ્યા બિન્દુસ્ત્રિકોણમષ્ટકોણં દશકોણં દશકોણં મનુકોણમષ્ટપત્તં ષોડશપત્ત વૃત્તત્રયં સન્ધ્યાવૃત્તૈરિશોભાયમ । મહાશ્રીચક્રરાજં સર્વયન્ત્રોત્તમ
મોક્ષદ્વારં બ્રહ્માણ્ડાકારરૂપં ભૂગોલચક્ર શ્રીચક્રમ્ । યઃ શ્રીચક્ર વેત્તિ સ સર્વં
વેત્તીતિ ॥ ૫॥

આધારનવક મુદ્રાશક્તયઃ । પૃથિવ્યપ્તેજવાય્વાકાશશબ્દસ્પર્શરસરૂપગન્ધવાક્પાણિપાદપાયુપસ્થમનોવિકારાઃ કામાકર્ષિણ્યાદયઃ ષોડશશક્તયઃ । વચનાદાનગમનવિસર્ગાનન્દહાનોપાદાનોપેક્ષાખ્યબુદ્ધયો અનઙ્ગકુસુમાદ્યષ્ટૌ ।
કામક્રોધલોભમોહમદમાત્સર્યપુણ્યપાપમયા બ્રાહ્મયાદ્યષ્ટશક્તયઃ । અલમ્બુસા કુહૂર્વિશ્વોદરી
વારુણી હસ્તિની ગાન્ધારી યશોવતી પયસ્વિની પૂષા શઙ્ખિની સરસ્વતી ઇડા
પિઙ્ગલા સુષુમ્ના ચેતિ ચતુર્દશ નાડ્યઃ સર્વસઙ્ક્ષોભણ્યાદિ ચતુર્દશશક્તયઃ । પ્રાણાપાનવ્યાનોદાનસમાનનાગકૂર્મકૃકલાસદેવદત્તધ
દશ વાયવઃ સર્વસિદ્ધિપ્રદા દેવ્યો બહિર્દશારગા દેવતાઃ । એતદ્વાયુદશસંસર્ગોપાધિભેદેન રેચકઃ
પોષકઃ શોષકો દાહકઃ પ્લાવકઃ પ્રાણમુખ્યત્વેન પઞ્ચધા જઠરાગ્નિર્ભવતિ । સરિકો હારિકો ક્ષોભકો જૃમ્ભક મોહક
ઇતિ નાગપ્રાધાન્યેન પઞ્ચવિધાસ્તે મનુષ્યાણાં
દેહગાઃ । ભક્ષ્યભોજ્યચોષ્યલેહ્યપેયાત્મકં પઞ્ચવિધમન્નં પાચયન્તિ । એતદ્દશ વહ્નિકલાઃ સર્વજ્ઞાદ્યા અન્તર્દશારગા દેવતાઃ । શીતોષ્ણસુખદુઃખેચ્છાસત્ત્વરજસ્તમોગુણાન્વિતા વશિનીવાગ્દેવતાદ્યષ્ટશક્તયઃ । શબ્દાદિપઞ્ચતન્માત્રાઃ
પઞ્ચપુષ્પબાણાઃ ।
મન ઇક્ષુધનુઃ । રાગઃ પાશઃ । દ્વેષ અઙ્કુશઃ । અવ્યક્તાહકારમહત્તત્ત્વમિતિ । કામેશ્વરીવજ્રેશ્વરીભગમાલિન્યોઽન્તસ્ત્રિકોણગા
દેવતાઃ । શુદ્ધા નિરુપાધિકા સા
ચ દેવી કામેશ્વરી । સદાનન્દઘનઃ સ્વાત્મૈવ પરદેવતા । એતસ્ય સર્વસ્ય વિમર્શઃ
અનન્યચિત્તત્વેન ચ સિદ્ધિઃ । ભાવનાયાઃ ક્રિયા ઉપચારઃ કર્તવ્યમકર્તવ્યમુપાસિતવ્યમિતિ ય એવં વેદ કુબ્જિકાપૂજનોપનિષત્ ॥ ૬॥

## ॥ ૧૫ ॥

અથ ભુવનેશ્વરી વ્યાખ્યાસ્યામઃ ॥ પ્રાણેશઃ પ્રકૃત્યારૂઢં બિન્દુમાલિનીભૂષિતં
કલાકુબ્જિકાયુતમ્ ॥ ૧॥

મહાભુવનેશ્વર્યા મહામન્ત્રૈકાક્ષરમન્ત્રરાજં યો જાનાતિ સ ત્રૈલોક્યાધીશો ભવતિ
સ સકલસામ્રાજ્યેશ્વરો ભવતિ ॥ ૨॥

પૂજાસ્થાનમસ્યા અન્તઃષટ્કોણમષ્ટદલં ષોડશદલં ભૂપુરમિતિ ॥ ૩॥

શ્રીભુવનેશ્વર્યા પૂજાયન્ત્રરાજં યો જાનાતિ સ સર્વૈશ્વર્યવાન્ભવતિ ખેચરત્વં પ્રાપ્નોત્યેવં વેદ મહાકુબ્જિકાધ્યાનતત્ત્વોપનિષત્ ॥ ૪॥

## ॥ ૧૬ ॥

અથ ચૈતન્યભૈરવીં મહામન્નપૂર્ણેશ્વરી ભૈરવીં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં ચૈતન્યેશ્વરી ત્રિપુરસુન્દર્યારૂઢં માહેશ્વરીભૂષિતં કલામૃતાકર્ષણીયુતં પ્રથમમ્ । દ્વિતીયં
નીલકણ્ઠં મહાકાલં પિનાકીશં સમુચ્ચાર્ય માયાબીજમ્ । તતોऽમ્બિકાપતિ વૃકોદરી દીપારૂઢં જ્વાલામાલિનીભૂષિતં કલાકુબ્જિકામેલનં ક્વચિત્સુન્દરીયુતમ્ ।
ચૈતન્યભૈરવ્યા મહામન્ત્રરાજમ્ ॥ ૧ ॥

હ્રીં નમો ભગવતીતિ માહેશ્વરી પદં પુનઃ ।
અન્નપૂર્ણે ઠયુગલં વાગીશત્વપ્રદં પરમ ॥ ૨ ॥

ત્રિકોણં બિન્દુચક્ર તુ દલવેદસમન્વિતમ્ ।
વસુપત્તું ષોડશાબ્જ ભૂપુર દ્વારભૂષિતમ્ ॥ ૩ ॥

ઇદં યન્ત્રં યન્ત્રરાજં સર્વદેવૈઃ પ્રપૂજિતમ્ ।
બાલાભૈરવીવિદ્યાપિ ઐં ક્લીં સૌઃ ત્ર્યક્ષરી પરા ॥ ૪ ॥

રાત્રૌ તામ્બૂલપૂર્ણમુખં કૃત્વા સાધકસત્તમઃ ।
લક્ષમેકમનુજપ્ત્વા સ કૈવલ્યં પદમશ્નુતેતિ ॥

ય એવં વેદ મહાકુબ્જિકોપાસનોપનિષત ॥ ૫ ॥

## ॥ ૧૭ ॥

અથ પ્રચણ્ડોગ્રરૂપાં કર્તૃકપાલહસ્તાં પ્રત્યાલીઢપદા વિપરીતાસનસ્થા સ્વમુણ્ડધરાં લલજ્જિહ્વાં મહાઘોરાં ડાકિનીવર્ણિનીસહિતાં મહાછિન્નમસ્તાં વ્યાખ્યાસ્યામઃ ॥ ૧ ॥

પ્રથમં મહાલક્ષ્મીબીજમ્ । મહાલક્ષ્મીબીજં તુ વિસ્ફુલિઙ્ગિની વિશ્વમુખ્યારૂઢં બિન્દુમાલિનીભૂષિતં કલામૃતાકર્ષણીયુતમ્ । મહાલક્ષ્મીબીજમ્ । દ્વિતીયં
મનોભવબીજમ્ । મનોભવબીજં તુ મહાકાલી ધરારૂઢં ગોવિન્દસ્વરભૂષિતં કલાકલાનિધિયુતમ્ । મનોભવબીજમ્ । તૃતીયં ત્રપાબીજમ્ । ત્રપાબીજં તુ પ્રાણેશો
વેદકણ્ઠારૂઢં તૂર્યસ્વરભૂષિતં કલાકુબ્જિકાયુતમ્ । ત્રપાબીજમ્ । ચતુર્થં વાગ્ભવમ્ । વાગ્ભવં તુ સઙ્કર્ષણઃ કલાચેતનભૂષિતમ્ । વાગ્ભવં સમુચ્ચાર્ય વજ્રવૈરોચનીયે
પઠિત્વા ભુવનાદ્વયમ્ । તતોऽસ્ત્રબીજમ્ । તતઃ શક્તિર્વરેણ્યયુત પ્રચણ્ડસ્વરભૂષિત
પરમાત્મા વિનાયકભૂષિતમ્ ॥ ૨ ॥

મહામન્ત્રરાજં સપ્તદશાક્ષરી યો જાનાતિ સ સપ્તદ્વીપેશ્વરો ભવતિ સ ત્રિલોકેશ્વરો ભવતિ સ દેવેન્દ્રો ભવતિ સ પ્રચણ્ડોગ્રછિન્નમસ્તાપ્રત્યક્ષદેવતાદર્શનં કરોતિ સ છિન્નમસ્તાસ્વરૂપો ભવતિ સ સર્વદુષ્ટાન્મારયતિ શોષયતિ સ્તમ્ભયતિ જૃમ્ભયતિ સ ચતુર્દશભુવનાધીશો ભવતિ ॥ ૩॥

જ્વલચ્ચિતામધ્યસંસ્થા મદાઘૂર્ણિતલોચનામ ।
વિદ્યુત્કોટિપ્રતીકાશાં દાડિમીકુસુમોપમામ્ ।
એવં ધ્યાત્વા યજેચ્છિન્નાં ઘોરરૂપાં દિગમ્બરામ ॥ ૪॥

પૂજાસ્થાનમસ્યા અન્તઃ ક્રોધબીજં વિલિખ્ય તતસ્ત્રિકોણં દ્વારત્રયભૂષિતં વૃત્તત્રયં ત્રિકોણં સંલિખ્ય વસુપત્તૂ ભૂપુરમ્ ॥ ૫॥

પ્રચણ્ડોગ્રચણ્ડિકામહાછિન્નમસ્તાપુજાયન્ત્રરાજં યો જાનાતિ નિત્યં યોઽર્ચયતિ યોપાસનં સર્વદા કરોતિ સ્વશિખાયાં યો ધારયતિ સ બ્રહ્મત્વં પ્રાપ્નોતિ સ વિષ્ણુત્વં પ્રાપ્નોતિ સ રુદ્રત્વં પ્રાપ્નોતિ સ બ્રહ્મસમો ભૂત્વા સર્વાન્દેવાન્સર્વાંલ્લોકાન્સર્વાત્માનં સંસૃજતિ વિષ્ણુસમો ભૂત્વા સ સર્વાન્દેવાન્સર્વાંલ્લોકાન્સર્વાત્માનમ્ ।
પ્રતિપાલયતિ સ રુદ્રસમો ભૂત્વા સર્વાન્દેવાન્સર્વાંલ્લોકાન્સર્વાત્માનં જગત્સ્થાવરજઙ્ગમં ભૂતં ભવદ્ભવિષ્યત્સર્વં સંહારયતિ સ સર્વશાસ્ત્રાર્થં જાનાતિ સ વેદાર્થં
કરોતિ સ સર્વશાસ્ત્રાધ્યાપકો ભવતિ ન્યાયમીમાંસાસાઙ્ખ્યપાતઞ્જલવ્યાકરણવેદાગમજ્યોતિષધર્મશાસ્ત્રાર્થં જાનાતિ સ આયુર્વેદધનુર્વેદગાન્ધર્વવેદાર્થશાસ્ત્રં
જાનાતિ સ સકલશાસ્ત્રાર્થં જાનાતિ ય એવં વેદ ॥ ૬॥

મહાભૂતદિનાર્ધરાત્રૌ ગત્વા શ્મશાને નિર્જને મહોગ્રપીઠાલયે બીજેન સ્નાત્વા પ્રચણ્ડચણ્ડિકા ધ્યાત્વા પીત્વા ભુક્ત્વા નત્વા સ્મૃત્વા પ્રચણ્ડોગ્રચણ્ડિકાછિન્નમસ્તાપૂજાચક્રરાજં પશ્ચિમાભિમુખં સંસ્થાપ્ય મહાપઞ્ચમકારૈઃ સમ્પૂજ્ય વિધિવત્સન્તર્પ્ય જપ્ય સમર્પ્ય મહામાંસં મધુનાભિઘારિતં સાજ્યં રક્તચન્દનં રક્તોત્પલસહસ્રં
કરવીરસહસ્રં જુહયાત્ । શક્તિ સન્તોષ્ય પઞ્ચમં કૃત્વા સ્વરેતસા છિન્નમસ્તાં સન્તર્પ્ય કુણ્ડગોલોદ્ભવેન સ્વયમ્ભૂપુષ્પેન સર્વદા યજેત્ ॥ ૭॥

સ નવદ્વીપેશ્વરો ભવતિ સ મહારાજરાજેશ્વરો ભવતિ સ ચતુર્દશભુવનાધીશો ભવતિ સ મહાકવિર્ભવતિ સ મહાકવીન્દ્રેશ્વરો ભવતિ ય એવં વેદ મહાકુબ્જિકાપૂજનોપનિષત્ ॥ ૮॥

## ॥ ૧૮॥

અથ ધૂમાવતીં વ્યાખ્યાસ્યામઃ ॥ પ્રથમં વક્રતુણ્ડં મહાવિદ્યેશ્વરીભૂષિતં કલાકુબ્જિકાયુતમ્ । તતઃ શબ્દાત્મા કુબ્જસ્વરભૂષિતમ્ । તૃતીયં વૈખુણ્ઠં પિતામહભૂષિતમ્ ।
ચતુર્થં વરેણ્યમ્ । પઞ્ચમં વારાહી સર્વેશ્વરી મોહિનીભૂષિતમ્ । આગમઃ પ્રમત્તઃ
શરીરાકર્ષણીસંયુતમ્ ॥ ૧॥

મહાધૂમાવતી યો જાનાતિ સ સર્વસૌભાગ્યારોગ્યધનધાન્યપુત્રપશુકીર્તિજ્ઞાનૈશ્વર્યવાન્ભવતિ સ ત્રૈલોક્યં જયતિ સ રુદ્રત્વં પ્રાપ્નોત્યેવં વેદ ॥ ૨॥

પૂજાયન્ત્રમસ્યા અન્તઃષટ્કોણં વસુપત્તં ભૂપુરમ્ ॥ ૩॥

ધૂમાવત્યાઃ પૂજાચક્રરાજ શ્મશાને નરરક્તેન વિલિખ્ય મહાશકોપરિ મહાપઞ્ચમકારૈઃ પઞ્ચોપચારૈઃ સ્વયમ્ભૂકુસુમૈઃ સમભ્યાક્ષમાલયા નિયમેન યો
લક્ષમાવર્તયતિ સ બ્રહ્માદિમારણં કરોતિ સ સર્વાન શત્રૂન્મારયત્યુચ્ચાટયતિ
સ્તમ્ભયતિ દ્વેષયતિ ષટપ્રયોગસિદ્ધિભાગ્ભવતિ સ ખેચરત્વં પ્રાપ્નોત્યેવં વેદ મહાકુબ્જિકાર્ચનતત્ત્વામૃતસારોપનિષત્ ॥ ૪॥

## ॥ ૧૯॥

અથ મહાબ્રહ્માસ્ત્રવિદ્યા ષટ્ત્રિંશતિરત્નાક્ષરી મહાપીતામ્બરા પીતસિંહાસનસ્થા
પીતગન્ધાનુલેપના પીતપુષ્પાઞ્જલિરતા સ્વર્ણાલઙ્કારભૂષિતા મહાપીતવર્ણા પીતામ્બરા બ્રહ્માસ્ત્રવિદ્યા । મહાબગલામુખ્યાઃ ષટ્ત્રિંશતિરત્નાક્ષરી વ્યાખ્યાસ્યામઃ ॥ ૧॥

પ્રથમં વેદાદિબીજમ્ । વેદાદિબીજં તુ જ્વાલામાલિની કામકલાવૃષધ્વજભૂષિતમ્ । વેદાદિબીજ પ્રથમમ્ । દ્વિતીયં સ્થિરમાયાબીજમ્ । સ્થિરમાયાબીજં તુ
પરમાત્મા વ્યાપકારૂઢ બિન્દુમાલિનીભૂષિતં કલામૃતાકર્ષણીયુતં સમુચ્ચાર્ય કપર્દિની [ ॥ ।] પિનાકીશઃ કાશીશ્વરભૂષિતં પુરુષોત્તમઃ શત્રુઘ્નસ્વરભૂષિતં કપાલી
પરાપરભૂષિતં દુર્ગોત્તારિણી સાગરઃ શિરસિ વહ્નયારૂઢ યોગિની મોહિનીભૂષિતં
પરમેષ્ઠી ખેચરીભૂષિતં ભગમાલિનીયુતં શબ્દાત્મા વિઘ્નરાજભૂષિતં પૂર્ણિમાયુતં
નર્તકઃ
ઃ સુરાન્તકસ્વરભૂષિતં ચતુર્મૂર્તિસ્વરૂપિણ્યમૃતાકર્ષણીયુતં વૈકુણ્ઠઃ ષડ્કૃસ્વરભૂષિતં પ્રચણ્ડઃ કુબ્જિકાભૂષિતં સહજાષાઢી કુબ્જિકાભૂષિતં વિશ્વમૂર્તિઃ
સઙ્કર્ષણશ્ચતુરાનનં નેપાલસ્વરભૂષિતં પ્રાણેશં વારુણીયુતં કાશીશ્વરભૂષિતં કુબ્જિકાયુતં મહાકાલં મહામાયાભૂષિતં વ્યાપકં સુમુખેશ્વરી મહાકાલી પરાપરભૂષિતં

પરાયણઃ પ્રકાશં પઠિત્વા બુદ્ધિં નાશય ઇત્યુચ્ચાર્ય સ્થિરમાયાં પુનઃ પ્રણવં
સ્વાહાન્તે ચ યોજયેત્ ॥ ૨॥

મહાબગલામુખ્યાઃ ષટ્ત્રિંશતિરત્નાક્ષરી યો જાનાતિ સ શત્રુસેનાસ્તમ્ભનં કરોતિ
સ દેવાન્સ્તમ્ભયતિ સ લોકાન્સ્તમ્ભયતિ સ સોમં સ્તમ્ભયતિ સ સૂર્યં સ્તમ્ભયતિ
સ સર્વં જયતિ ॥ ૩॥

પૂજાયન્ત્રમસ્યા બિન્દુસ્ત્રિકોણં ષટ્કોણં વૃત્તં વસુપત્તું ચતુ'રશોભિતં બ્રહ્માસ્ત્રયન્ત્રરાજ ભવતિ ॥ ૪॥

યોઽર્ચયતિ સ સર્વદેવપૂજ્યો ભવતિ સ સર્વદેવસમો ભવતિ ય એવં વેદ
મહાકુબ્જિકાપૂજનતત્ત્વામૃતોપનિષત્ ॥ ૫॥

## ॥ ૨૦॥

અથ રાજમાતઙ્ગિનીં નીલોત્પલનિભાં નીલવસ્ત્રપરીધાનાં નીલગન્ધાનુલેપનાં
નીલસિંહાસનસ્થાં નીલશુકહસ્તાં નીલાભરણભૂષિતાં મહાનીલા સર્વ વિદ્યારાજ્ઞી
મહામાતઙ્ગી વ્યાખ્યાસ્યામઃ ॥ ૧॥

પ્રથમં વેદાદિબીજમ્ । દ્વિતીયં ત્રપાબીજમ્ । તૃતીયં કામરાજં પઠિત્વા
માતઙ્ગિન્યૈ સમુચ્ચાર્ય ફટ્સ્વાહાન્તેઽપિ યોજયેત્ ॥ ૨॥

મહામાતઙ્ગી યોઽર્ચયતિ સ્મરતિ ધારયતિ ગુરુમુપાસ્તે સ સર્વસામ્રાજ્યવાન્ભવતિ
સ ચતુર્વર્ગફલભાગ્ભવતિ ય એવં વેદ ॥ ૩॥

પૂજાચક્ર બિન્દુસ્ત્રિકોણં વસુપત્રં ષોડશાબ્જ ચતુર્ધારહીનમ્ ॥ ૪॥

રાજમાતઙ્ગીમહાવિદ્યશ્ચર્યાઃ પૂજાયન્ત્રરાજં યો જાનાતિ સ ખેચરો ભવતિ । મહાનિશાર્ધે મહાપઞ્ચમકારૈઃ સર્વદા
યજેદિતિ વદન્તિ બ્રહ્મવાદિનઃ શૌનકાઃ ॥ ૫॥

મેષમાર્જારરક્તેન સ્વયમ્ભૂકુસુમેન ચ ।
કુણ્ડગોલોદ્ભવૈર્મીસૈર્માતઙ્ગીં સર્વદા યજેત્ ॥ ૬॥

એવં યોઽર્ચયતિ સ મહારાજેન્દ્રો ભવતિ સ ત્રૈલોક્યાધીશો ભવતિ સ બ્રહ્માનન્દમયો ભવતિ સ જ્ઞાનાનન્દમયો ભવતિ
સ તત્ત્વાનન્દમયો ભવતિ સ પૂર્ણાનન્દમયો
ભવતિ સ સર્વાનન્દમયો ભવતિ સ નિર્વાણેશ્વરો ભવતિ સ કૈલાસાધિપો ભવતિ સ
લોકાધિપો ભવતિ સ સર્વવિદ્યાધિપો ભવતિ ય એવં વેદ મહાકુબ્જિકોપનિષત્ ॥ ૭॥

## ॥ ૨૧॥

અથ મહાસિદ્ધિલક્ષ્મી સર્વ વિદ્યેશ્વરી મહાસુભગાં પઞ્ચાનનાં ત્રિપઞ્ચાયતાક્ષીં દશભુજાં રત્નસિંહાસનસ્થાં રત્નાભરણભૂષિતાં સર્વલક્ષણસમ્પન્નાં સિદ્ધિલક્ષ્મી વ્યાખ્યાસ્યામઃ ॥ ૧॥

પ્રથમં તારબીજમ્ । તારબીજં તુ પશ્ચિમાસ્યઃ કુબ્જિકાભૂષિતમ્ । તારબીજમ્ ।
દ્વિતીયં ભુવનેશ્વરીબીજમ્ । ભુવનેશ્વરબીજં તુ ચૈતન્યં વેદકણ્ઠારૂઢં કામકલાભૂષિતં કલાકુબ્જિકાયુતમ્ ।
ભુવનેશ્વરીબીજમ્ । તૃતીય ક્રોધબીજમ્ । ક્રોધબીજં તુ
પરાત્મા મહાવિદ્યેશ્વરીભૂષિતં કલાકુબ્જિકાયુતમ્ । ક્રોધબીજમ્ । ચતુર્થં પ્રાણેશઃ
પિતામહભૂષિતં કલાકુબ્જિકાયુતમ્ । પઞ્ચમં રાવબીજમ્ । રાવબીજં તુ પ્રયાગઃ
પ્રકૃત્યારૂઢં ભગવતીભૂષિતં કલાકુબ્જિકાયુતમ્ । રાવબીજમ્ । ષષ્ઠં નૃસિંહબીજમ્ ।
નૃસિંહબીજં તુ ક્ષેત્રપાલ ઃ પશ્ચિમાસ્યસ્વરભૂષિતં કલાકુબ્જિકાયુતમ્ । નૃસિંહબીજમ્ । સપ્તમં મહાઙ્કુશબીજમ્
। મહાઙ્કુશબીજં તુ મહાકાલઃ સદ્યોજાતસ્વરભૂષિતં
કલાકુબ્જિકાયુતમ્ । મહાઙ્કુશબીજમ્ । અષ્ટમં શબ્દાત્મા । નવમ મહાજીવઃ
શરીરાકર્ષણીયુતમ્ । નવમમ્ ॥ ૨॥

શ્રીસિદ્ધિલક્ષ્મ્યા મહાનવાર્ણમૂલમન્ત્રરાજ યો જાનાતિ સ સિદ્ધિલક્ષ્મીસ્વરૂપો
ભવતિ સ નવદ્વીપેશ્વરો ભવતિ સ સર્વસિદ્ધિભાગ્ભવતિ સ મહાદેવેન્દ્રો ભવતિ સ
સર્વવિદોશ્વરો ભવતિ ય એવં વેદ ॥ ૩॥

પૂજાયન્ત્રમસ્યા અન્તસ્ત્રિકોણં બિન્દુચક્ર બહિઃષટ્કોણં દ્વાદશદલં વસુદલં વીથીશોભાભૂષિતં દ્વારચતુષ્કમ્ ॥ ૪॥

શ્રીસિદ્ધિલક્ષ્મ્યા મહાપૂજાયન્ત્રરાજં સર્વયન્ત્રોત્તમં સર્વયન્ત્રમયં મહાસિદ્ધિયન્ત્રં
મોક્ષદ્વારં યદ્યોગિન્ય ઉદ્દિશ્ય નિર્વાણમુપવિશન્તિ બાહ્યાદિક્રમેણ કુબ્જિકાયન્ત્ર
પૂજયેત્ । કરાઙ્ગન્યાસં કૃત્વા દ્વારદેવતાં પૂજયેત્ । વામહસ્તેન પૂજનં વામમાર્ગેણોપાસનં વામકરમાલયા સર્વદા
કુબ્જિકામનુજપેત્ । સ્વશક્ત્યા યુક્તો વા
કુલાષ્ટકો યત્નતઃ શક્તિસહિતઃ સાધકો સર્વદા કુબ્જિકાં યજેત્ ॥ ૫॥

ૐ સ ક લ વાગૂપિણ્યૈ શ્રીમહાકુબ્જિકાયૈ કનિષ્ઠાભ્યાં નમઃ । હ્રીં સ ક
લ બ્રહ્મવાનપિણ્યૈ શ્રીબ્રહ્મકબ્જિકાયૈ અનામિકાભ્યાં નમઃ । ક્લીં સ ક લ
વિષ્ણુવાગ્રૂપિણ્યૈ શ્રીવિષ્ણુકુબ્જિકાર્ય મધ્યમાભ્યાં નમઃ । હ્સ્ખ્લૈં સ ક લ
રુદ્રવામૂપિણ્યૈ શ્રીસિદ્ધિકુબ્જિકાયૈ તર્જનીભ્યાં નમઃ । ચૌં અઘોરવાગૂપિણ્યૈ
શ્રીશ્મશાનકુબ્જિકાય કરતલપૃષ્ઠાભ્યાં નમઃ ॥ એવં હૃદયાદિષુ ન્યાસમાચરેત્ ॥

ઇન્દ્ર ત્વેતિ મન્ત્રેણ મહેન્દ્ર મહાગજરાજૈરાવતં સમ્પૂજ્ય ॥ ૭॥

યેऽદૃહ્યનૃજવેતિ મન્ત્રેણ યમં પૂજયેત્ ॥ ૮॥

વરણો વારયેતિ મન્ત્રેણ વરુણમભ્યર્ચયેત્ ॥ ૯॥

ધન્વના ગા મન્ત્રેણ કુબેરં પશ્ચિમાદિવામાવર્તેન યજેત્ ॥ ૧૦॥

જયા વિજયા અપરાજિતા મોહિની સ્તમ્ભિની જૃમ્ભિની સર્વાકર્ષણી સર્વવિદ્રાવિણીં પશ્ચિમાદિવામાવર્તેનાષ્ટકોણે સમભ્યર્ચ્ય । હાં હાકિની રાં રાકિની ડાં
ડાકિની કા કાકિની શાં શાકિની લા લાકિની ષટ્કોણેષુ સમ્પૂજ્ય । ૐ ગં
ગઙ્ગાયૈ ૐ યં યમુનાયૈ ૐ સં સરસ્વત્યૈ નમઃ । ઇતિ ત્રિકોણચક્રે યજેત્ ॥ ૧૧॥

મૂલેન બિન્દુચક્રોપરિ । ૐ શ્રીં ઐં ઊં શ્રીં મહાકુબ્જેશ્વરાઙ્કસ્થાયૈ શ્રીકુલકુબ્જિકાયૈ નમો નમો । ઇત્યનેન કુબ્જિકાં યજેત્ ॥ પૂર્વોક્તક્રમેણ કાલિકા
તારા મહાષોડશી ભુવનેશ્વરી ભૈરવી છિન્નમસ્તા ધૂમાવતી બગલામુખી માતઙ્ગી
શ્રીસિદ્ધિલક્ષ્મી પૂર્વોક્તમન્ત્રેણ તત્તર્પણં ત્રિકોણે તદ્વિધાયન્ત્રભાવના કર્તવ્યમિતિ । વદન્તિ બ્રહ્મવાદિનઃ શૌનકાઃ ॥ ૧૨॥

વિકલ્પાનામાત્મનિ વિલયં હોમઃ । ભાવનાવિષયાનામભેદભાવના તર્પણમ્ ।
ઇન્દ્રિયરૂપપશુચ્છેદનમનિન્દ્યા સર્વજીવદયા બ્રાહ્મણભોજનં સર્વં ખલ્વિદં બ્રહ્માનન્દમયં સત્યં જ્ઞાનમનન્તં બ્રહ્મ હ વા ઇદમગ્ર આસીત । સ્વયં ત્વેકમેવાત્માનં
જ્ઞાનં જાગ્રત્સ્વપ્નસુષુપ્તિધ્યાનં દક્ષિણાદાનમ્ । પૂર્ણબ્રહ્મૈકરસાનન્દરસાભિષેકમ્ ॥ ૧૩॥

એવં મુહૂર્તત્રિતયં મુહૂર્ત દ્વિતયં મુહૂર્તૈકમાત્રં કુબ્જિકાભાવનપરો જીવન્મુક્તો ભવતિ । તસ્ય કુબ્જિકાત્મૈક્યં સિદ્ધિઃ । ચિન્તિતકાર્યાપ્યયત્નેન ચ સિધ્યતિ । સ
બ્રહ્મા સ શિવઃ સેન્દ્રઃ સોઽગ્નિઃ સોઽક્ષરઃ સંરાટસ્વરાટપુરુષો ભવતિ સ
સર્વદેવસમો ભવતિ ય એવં વેદ મહાકુબ્જિકાપૂજામૃતોપનિષત્ ॥ ૧૪॥

## ॥ ૨૨॥

ઇન્દ્રઃ પ્રજાપતિમપૃચ્છત્ । કિ મોહનં કથં ત્રિજગદ્વશીકરણં કેનોપાયેન શત્રુસેનાસ્તમ્ભનં કથં દુન્દુભિવિધાનમ્ ॥ ૧॥

પ્રોવાચ ભગવાન્પ્રજાપતિઃ । પઞ્ચશતાઙ્ગુલિપ્રમાણોર્ધ્વવિસ્તારં પઞ્ચશતાઙ્ગુલિપ્રમાણં
મધ્યવિસ્તારં બાલમૃદુકોમલચર્મેણ વા શ◌ૃગાલચર્મેણ વા સંવેષ્ટનં કૃત્વા શ્મશાને
મહાનિશાર્ધે ગત્વા પ્રત્યઙ્ગિરાં વા રુદ્રકુબ્જિકાં ધ્યાત્વા સઙ્કલ્પં કૃત્વા પીત્વા
મેધસૂક્તેન નરબલિદાનં કુર્યાત્ ॥ ૨॥

ઉચ્ચૈ? ષો દુન્દુભિઃ સૂક્તદ્વયેન સમ્પૂજ્ય સહસ્રક સમ્ઞપ્ય તર્પ્ય સમર્પ્ય જવાસહસ્રં
કરવીરાયુતં જ્વલચ્ચિતાયાં જુહુયાત્ ॥ ૩॥

પશ્ચિમાભિમુખે સ્થિત્વા ઉલૂકભૈરવં શ‍ૃગાલભૈરવં કાકભૈરવં ગૃધ્રભૈરવં વેતાલભૈરવ સંહારભૈરવં વિદ્રાવણભૈરવં મહોડ્ડીશભૈરવં પઞ્ચમકારેણ પૂજયિત્વા પ્રાર્થયેત્ ॥ ૪॥

ખ ફ્ટ જહિ મહાકૃત્યે વિધૂમાગ્નિસમપ્રભે ।
દેવીદેવિ મહાકુબ્જે મમ શત્રૂન્વિનાશય મમ શત્રૂન્વિનાશયોં નમઃ ॥ ૫॥

પ્રત્યઙ્ગિરાસૂક્તગણેન દુન્દુભિવાદ્યં કુર્યાત્ । સ દુન્દુભિવાદ્યં શ્રુત્વા સર્વશત્રુસેનાઃ પલાયતિ સ નિદ્રયા મોહયતિ મહાશૂરોઽપિ શિથિલો ભવતિ તસ્ય પરાજયો ભવતિ ય એવં વેદ મહાદુન્દુભિવિધાનમ્ । સ સર્વશત્રુસેનાન્મારયતિ સ ત્રૈલોક્યં જયતિ સ દેવલોક જયતિ સ મૃત્યુલોક જયતિ સ રુદ્રલોક જયતિ સ બ્રહ્મલોક જયતિ સ વિષ્ણુલોક જયતિ સ ભૂર્લોક જયતિ સભુવર્લોક જયતિ સ સ્વર્લોક જયતિ સ મહર્લોક જયતિ સ જનલોક જયતિ સ તપોલોક જયતિ સ સત્યલોક જયતિ સ સર્વલોક જયતિ ય એવં વેદ મહાકુબ્જિકાપૂજનપ્રયોગોપનિષત્ ॥ ૬॥

## ॥ ૨૩॥

અથ મહામોહનં દેવમોહનં લોકમોહન રાજ્યમોહન શક્તિમોહનં સર્વમોહનં વ્યાખ્યાસ્યામઃ ॥ ૧॥

મહાભૂતદિનાર્ધરાત્રૌ એકાકી સાધકો ગત્વા પશ્ચિમાભિમુખે સ્થિત્વા મહાકુબ્જિકાયન્ત્રરાજમષ્ટગન્ધેન મહાશઙ્ખોપરિ સંલિખ્ય શવાસનોપવિશ્ય મહાસમ્મોહનભૈરવં સ્વચ્છન્દભૈરવં વજ્રભૈરવં ભૂતભૈરવં કપાલભૈરવં મહાકાલભૈરવં મહોન્મત્તભૈરવં મહાકાશભૈરવં પઞ્ચામૃતેન પઞ્ચમકારેણ સમ્પૂજ્ય મહાસવેન સન્તર્પ્ય મેષમહિષબલિદાનં સમર્પ્ય કુમારી સમભ્યર્ચ્ય કુલશક્તિ સન્તોષ્ય મૃદુકોમલાસનોપવિશ્ય દશમહાવિદ્યાસહિતાં મહાકુબ્જિકાં ચતુઃષષ્ટ્યુપચારેણ પઞ્ચમકારેણાભ્યર્ચ્ય ઇન્દ્રચિત્તાનિ મોહયતિ ॥ ૨॥

મહાત્રૈલોક્યમોહનસૂક્તમન્ત્રેણ મહાપ્રત્યઙ્ગિરાં વા મહાકુબ્જિકા સમ્પૂજ્ય મોહનસૂક્તમન્ત્રમયુતમેકં સઞ્જપ્ય વીરમુણ્ડપાત્રં મહાશવોપરિ સંસ્થાપ્ય પુષ્પવાસિતતૈલેન
સમ્પૂજ્ય વીરનાયેન ષોડશતન્તુભિર્વર્તિકાં કૃત્વા પશ્ચિમાભિમુખં દીપ પ્રજ્વાલ્ય મોહનસૂક્તેનાભ્યર્ચ્ય મોહનસૂક્ત સહસ્રૈક સઞ્જપ્ય તત્કજ્જલં લલાટે તિલક
કૃત્વા ॥ ૩॥

દેવલોક મોહયતિ સ સર્વલોક મોહયતિ સ બ્રહ્મલોક મોહયતિ સ રુદ્રલોક મોહયતિ સ વિષ્ણુલોક મોહયતિ સ સર્વાન્દેવાન્મોહયતિ સ સર્વાંલ્લોકાન્મોહયતિ ય એવં વેદ કુબ્જિકાપૂજનતત્ત્વામૃતપ્રયોગબીજસાગરોપનિષત્ ॥ ૪॥

## ॥ ૨૪॥

અથ બ્રહ્માદિમારણં મહામારણપ્રયોગં વ્યાખ્યાસ્યામઃ ॥ ૧॥

તત્રાસુરી મહાપ્રત્યઙ્ગિરાં યજેત્ । ભૌમાષ્ટમ્યાં વામાવાસ્યાયાં પ્રયોગં કારયેત્ ॥ ૨॥

પિતૃભૂમૌ મહાનિશાર્ધે ગત્વાસુરી ચક્રે પ્રથમેદં કિલેત્યેકર્મન્ત્રેણાસુરીરાજિકા
રોપણં કૃત્વા ચતુર્દિક્ષુ ચણ્ડોગ્રશૂલપાણિભૈરવં પ્રેતાકર્ષણભૈરવં સ્વર્ણાકર્ષણભૈરવં
વીરાકર્ષણભૈરવં જીવાકર્ષણભૈરવં મહોગ્રવિરૂપાનન્દભૈરવં કુબ્જભૈરવં ચણ્ડભૈરવં
પઞ્ચોપચારૈઃ પઞ્ચમકારૈઃ સમભ્યર્ચ્ય મહાસવેન સન્તર્પ્ય મહામાંસં સમર્પ્ય કુલસુન્દરી સન્તોષ્ય કુમારી સમ્પૂજ્ય
ઈશાનાં ત્વેતિ સૂક્તત્રયં યાં કલ્પયન્તિ સૂક્તત્રયં
સહસ્રૈક સઞ્જપ્ય સમલ્ ॥ ૩॥

ક્સં ભક્ષ જ્વાલાજિહ્વે કરાલદંષ્ટ્ર પ્રત્યઙ્ગિરે ક્ષં હ્રીં નમઃ ॥ ૪॥

ઇતિ વિંશત્યક્ષરી । મહાયન્ત્રરાજપુટિતં વા પ્રત્યઙ્ગિરાસૂક્તગણમન્ત્રપુટિતેન વા
શત્રુનામપુટિતં શતમષ્ટોત્તરસહસ્રં સમ્મપ્ય સમલ્ ॥ ૫॥

અયં પ્રતિસરો મણિર્વીરો વીરાય બધ્યતે ।
વીર્યવાન્સપત્નહા શૂરવીરઃ પરિપાણઃ સુભઙ્ગજઃ ॥

ઇત્યનેન કૃષ્ણાપરાજિતાપુષ્પાઞ્જલિં દદ્યાત્ ॥ ૬॥

કુબ્જિકા ઊપનિષદ્
ખ્ક્ષે નમઃ સકલશત્રુસંહારિણિ રુદ્રકુબ્જિકે મમામુકશત્રુ સપરિવારં નાશય ૨
મારય ૨ શોષય ૨ લેદય ૨ છેદય ૨ વિધ્વંસય ૨ પચ ૨ મથ ૨ દહ ૨ હૈં મહાવીરકુબ્જિકે હસ્તૈ વિપરીતકુબ્જિકે હૈં
સંહારકુબ્જિકે હૈં
શત્રુશિરસ્ફોટનં કુરુ ફટ્ સ્વાહા ॥ ૭॥

ઇત્યનેન જ્વલતિ ચિતાગ્નૌ સૈન્ધવં શ્વેતસર્ષપં લવણસૂક્તેન હોમયેત્સહસ્રક મહાનિશાયામ્ ॥ ૮॥

એકરાત્રિપ્રયોગેન બ્રહ્માદિશત્રૂન્મારયતિ ।
સપ્તરાત્રિપ્રયોગેન શત્રુપરિવારક્ષયં કરોતિ ॥ ૯॥

યથા વિદ્યુદ્ધતો વૃક્ષ આ મૂલાદનુશુષ્યતિ ।
એવં સમ્પ્રતિ શુષ્યતુ યો મે પાપં ચિકીર્ષતિ ॥

ઇત્યનેન સમ્પ્રાર્થયેત્ ।
ધ્યાત્વા કૃષ્ણાપરાજિતાપુષ્પાઞ્જલિપઞ્ચકં દદ્યાત્ ॥ ૧૦॥

કૃષ્ણવર્ણા બૃહદ્રૂપા બૃહત્સ્કન્ધિ મહદ્ભયિ ।
સિદ્ધિકુબ્જે મહાદેવિ મમ શત્રૂન્વિનાશયોં નમઃ ॥ ૧૧॥

ૐ ક્રૈં હ્રૌં અં અબન્ધદ્વિષો જહિ ॥ ઇત્યનેન બલિદાનં કુર્યાત્ । ધ્યાત્વા
સમર્પયેત્ ॥ ૧૨॥

ગૃધ્રકર્ણિ વિરૂપાક્ષિ લમ્બસ્તનિ મહોદરિ ।
જહિ શત્રુ ત્રિશૂલેન ક્રુદ્ધાસ્ય પિબ શોણિતમ્ ॥

ઇત્યનેન પ્રાર્થયેત્ ॥ ૧૩॥

ઘટિમાત્ર પ્રયોગેન સદ્યઃ શત્રૂન્મારયતિ ય એવં વેદ મહાકુબ્જિકાર્ચનામૃતબીજપૂર્ણોપનિષત્ ॥ ૧૪॥

## ॥ ૨૫॥

અથ ગ્રામવશીકરણં દેવવશીકરણં લોકવશીકરણં મહારાજવશીકરણં ત્રૈલોક્યવશીકરણં વ્યાખ્યાસ્યામઃ ॥ ૧॥

પિતૃભૂમૌ ગત્વા શવાસને સ્થિત્વા ।
યથેયં પૃથિવી મહી ભૂતાનાં ગર્ભમાદધે ।
એવા તે ધ્રિયતાં ગર્ભો અનુ સૂતં સહિતવે ॥ ૨॥

યથેયં પૃથિવી મહી દાધારેમાન્વનસ્પતીન ।
એવા તે ધ્રિયતાં ગર્ભો અનુ સૂતં સહિતવે ॥ ૩॥

યથેયં પૃથિવી મહી દાધાર પર્વતાન્ ગિરીન્ ।
એવા તે ધ્રિયતાં ગર્ભો અનુ સૂતં સહિતવે ॥ ૪॥

યથેયં પૃથિવી મહી દાધાર વિષ્ઠિતં જગત્ ।
એવા તે ધ્રિયતાં ગર્ભો અનુ સૂતં સહિતવે ॥

ઇત્યનેનાધારશક્તિ સંશોધ્ય વિઘ્નવિઘાતાય અભયં રક્ષાં કુર્યાત્ ॥ ૫॥

અભયં ચાવાપૃથિવી ઇહાસ્તુ નો અભયં સોમઃ સવિતા નઃ કૃણોતુ ।
અભયં નોઽસ્તૂર્વન્તરિક્ષ સપ્ત ઋષીણાં ચ હવિષાભયં નોઽસ્તુ ॥

ઇત્યનેન રક્ષાં કુર્યાત્ ॥ ૬॥

ઈર્માભ્યામયનં જાતં સક્થિભ્યાં ચેતિ સૂક્તં ષટસહસ્રં સમ્ગ્રપ્ય તર્પ્ય સમલ્
મહાકુબ્જિકા સમ્પૂજ્ય બલિદાનં કુર્યાત્ । સ્વર્ણપુષ્પાઞ્જલિં દદ્યાત્ ॥ ૭॥

મારણોચ્ચાટનવિદ્વેષણવશીકરણાકર્ષણમોહનસ્તમ્ભનાદિષટ્પ્રયોગસિદ્ધિદં

કુબ્જિકાસૂક્તં વ્યાખ્યાસ્યામઃ ॥ ૮॥

કુબ્જઃ શ્રોત્રિયમાપ્નોતિ કુબ્જૈક પરમેષ્ઠિનમ ।
કુબ્જૈકમગ્નિપુરુષો કુબ્જઃ સંવત્સરં મમે ॥ ૯॥

કુબ્જેદમનુક્ષયતિ કુબ્જ દેવજનૈર્વિષઃ ।
કુબ્જૈકમન્યં નક્ષત્રં કુબ્જિકા સત્યમુચ્યતે ॥ ૧૦॥

દ્યૌઃ પિતા કુબ્જિકા સત્યમાતા મૃત્યુર્દહતિ દેવિ ભદ્રમ્ ।
ભદ્રં વદ કુબ્જિકે ત્વં ભદ્રં નિત્યં કુરુષ્વ મે ॥ ૧૧॥

કુબ્જિકાપરં યુજ્યતાં કુબ્જ પૂર્વં કુબ્જિકાન્તતો મધ્યતો બ્રહ્મ કુબ્જિકા ॥

ઇતિ સિદ્ધિકુબ્જિકાસૂક્તમ્ ॥ ૧૨॥

કુબ્જિકોપાસકસ્ત્રિરાત્ર્યુપોષિતઃ પશ્ચિમાભિમુખો વાગ્યતઃ શવાસનોપવિશ્ય કુબ્જિકાસૂક્ત સહસ્રં કૃત્વાવર્તયેત્ । સિદ્ધિં તસ્યાર્થાઃ સર્વકર્માણિ વશ્યવિદ્વેષણોચ્ચાટનાકર્ષણમોહનમારણાનિ સર્વકર્માણિ સિધ્યન્તિ સ દૈવમાનુષો ભૂત્વા સ્વર્ગે મ]
પાતાલે વિચરતિ સ ખેચરો ભવતિ ય એવં વેદ કુબ્જિકોપાસનામૃતપૂર્ણોપનિષત્ ॥ ૧૩॥

પ્રાણાન્તેઽપિ ન પ્રકાશયેત્ । સર્વદા પ્રાણાતિપ્રિયં કુબ્જિકોપનિષદં સર્વોપનિષત્સારં ગોપયેત । યથોક્તસાધનપ્રયોગપૂજનં કૃત્વા યથોક્તસિદ્ધિભાગ્ભવતીતિ
વેદઃ ॥ ૧૪॥

ઇત્યથર્વણરહસ્યે મહાકુબ્જિકાકાણ્ડે કુબ્જિકોપાસનામૃતપૂર્ણોપનિષત્ સમાપ્તા ॥

Proofread by Mandar Kulkarni

*Kubjika Upasanamrita PurnopaniShad*
pdf was typeset on January 26, 2026

Please send corrections to *sanskrit@cheerful.com*